वर्षम् – ७१
अङ्कः – ६
चैत्रमासः
विक्रमाब्दः २०७७–७८
युगाब्दः ५१२२–२३
अप्रैल, २०२१

ISSN 2249-698X


# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः १५/–
वार्षिक–शुल्कम्
१५०/–
पञ्चवार्षिकशुल्कम्
७००/–
आजीवनसदस्यता
(१५ वर्षाणि)
२१००/–

प्रकाशन प्रत्येक माह की 1 तारीख

**भारतीया जनाः सर्वे प्रतीक्षन्ते सभक्तिकम्।**
**निर्मीयते ह्ययोध्यायां विशालं राममन्दिरम्॥**



## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | श्रीरामजन्मभूमिसंघर्षगाथा | डॉ. नाथूलालसुमनः | ५ |
| ३ | दैवं-पुरुषार्थश्च | प्रोफेसर सोहनलालशर्मा | ९ |
| ४ | ।। मुधमत् पार्थिवँ रजः ।। [ यजुर्वेदः 13/28 ] | प्रोफेसर सुरेन्द्रकुमारशर्मा | १४ |
| ५ | अध्यात्मरामायणे धर्मप्रतिष्ठापकः श्रीरामः | डॉ. स्नेहलता शर्मा | २० |
| ६ | राष्ट्रियशिक्षानीतौ ( 2020 ) संस्कृतम् | डॉ. कुलदीपसिंहः | २२ |
| ७ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | २६ |
| ८ | पत्रकारिताक्षेत्रे डॉ. भीमराव-अम्बेडकरस्य योगदानम् | गिरीश शास्त्री | २८ |
| ९ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३० |
| १० | आयुर्वेद-स्तम्भः | प्रो. बनवारीलालगौडः | ३२ |
| ११ | संस्कृतसमाचाराः | सम्पादकः | ३६ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

**दूरभाषः 0141–2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**

ISSN2249-698X

।। श्रीशः ।।

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
श्रीश्यामशरणदेवाचार्यः
( निम्बार्कपीठं सलेमाबादः )
स्वामी रामभद्राचार्यः
( चित्रकूटः )
स्वामी अवधेशानन्दगिरिः
( हरिद्वारम् )
महन्तः गोविन्ददेवगिरिः
( पुणे )
स्वामी राघवाचार्यवेदान्ती
( अग्रपीठं रेवासा )
स्वामी संवित् सोमगिरिः
( बीकानेरम् )
महन्तः प्रतापपुरी
( तारातरामठं बाडमेरम् )
श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रोफेसर सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादकः
डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्

अध्यक्षः
प्रोफेसर शङ्करप्रसादशुक्लः

उपाध्यक्षौ
डॉ. नाथूलालसुमनः
डॉ. नन्दसिंहनरूकाः

सचिवः
डॉ. सुधीरकुमारशर्मा

सहसचिवः
कृष्णकुमारशर्मा

व्यवस्थापकः
राजीवदाधीचः
9352030291

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com
वेबसाईट : www.bhartipatrika.org

वर्षम् 71 अङ्कः -6
चैत्रमासः
विक्रमाब्दः 2077-78
अप्रैल, 2021

एकस्याः प्रतेः 15/-
वार्षिकशुल्कम् 150/-
पञ्चवार्षिकशुल्कम् 700/-
आजीवनसदस्यताशुल्कम् 2100/- ( 15 वर्षाणि )

सम्पादकीयम्

# रामं भजे श्यामलम्

...✍ प्रोफेसर श्रीकृष्णशर्मा

यदा धर्मग्लानिर्भवति तदाऽवनितलेऽस्मिन् परमेश्वरस्यांश-भूत: कश्चन योगी प्राणिविशेषो वाऽवतरति, धर्मञ्च प्रतिष्ठापयति। योगी द्विविधो भवति-युक्त-युञ्जानभेदत:। स्वस्यावतारभूतस्य यस्य सर्वदा भानं भवति, स 'युक्तयोगी' ति कथ्यते। श्रीकृष्ण: षोऽशकल: सर्वदा स्वकीयमवतारस्वरूपं जानातिस्म। अतश्चोच्यते 'कृष्णस्तु भगवान् स्वयम्'। स यदा यदिच्छति तदेव प्राप्नोतिस्म। अत: स युक्तयोगी आसीत्।

दाशरथी राम: प्राणिभ्यो मर्यादापालनं स्वकीयैस्सदाचरणै: शिक्षते। अत: स मर्यादापुरुषोत्तम:। ईश्वरा-नुग्रहविशिष्टप्रसादवान् युक्तयोगी। संयम-सहकृत-महापुण्यवान् युञ्जानयोगी। स च धारणाध्यानाद्यत्मक संयमरूपचिन्तनशक्तिविशेषेण अलौकिक-साक्षात्कारात्मकं ज्ञानमधिगच्छति। श्रीरामो युञ्जानयोगीति वक्तुं शक्यते। स सामान्यप्रजावत् कष्टमनुभवति। यदा स समाधियुक्तो भवति, तदा सोऽनुभवति यदेतानि कार्याणि मयाऽनुष्ठेयानि।'रामो विग्रहवान् धर्म:' इत्युक्त्या स साक्षाद्धर्मस्वरूपो मन्यते। अत: स वक्ति-

**'धर्मस्य गोप्ता लोकेऽस्मिंश्चरामि सशरासन:।**
**अधर्मकारिणं हत्वा सद्धर्मं पालयाम्यहम्।।'** इति।।

स एव दाशरथी रामस्त्रेतायुगे वैवस्वत-मनु-निर्मिताया अयोध्या-नगर्या राजा बभूव। तेनानुष्ठेयं गुरुणामाज्ञापालनम् आचरितम्। परदारापहारकं रावण-बालिप्रभृतिं वधादिना दण्डितम्। अनुष्ठेयाऽननुष्ठेयञ्च स्वाचरणेन शिक्षितम्। पर्यन्ते दिव्यधामप्रयाणकाले तेन सहैव अयोध्यावासिनोऽपि सरयूजले अन्तर्हिता इत्युत्तर-काण्डे वाल्मीकि:।

जनशून्या अयोध्या राजा ऋषभेण पुन: संस्थापिता। तत्रैव विक्रमसंवत्-प्रवर्त्तकेन राजा विक्रमादित्येन श्रीरामस्य भव्यं मन्दिरं श्रीरामजन्मभूमौ निर्मापितम्। 1033 ख्रीष्टाब्दे 'महमूदगजनवी' त्यस्य भागिनेय: 'सालारमसूदगाजी' नामाक्रामकेण श्रीराममन्दिरं यद्यपि ध्वस्तम्, तथापि 'गहडवाल' वंशीयै राजभि: पुनरपि निर्मापितम्। प्रायेण पञ्चशताब्दानन्तरं 1528 तमे ख्रीष्टाब्दे मुगलशासकबाबरसेनापतिर्मीरबाँकी पुनरयोध्यामाक्रमत्। 8 नवम्बर, 2019 ईशवीयाब्दं यावत् 491 वर्षेषु नैकलक्षा रामभक्ता: श्रीरामजन्मभूमिमुक्तिप्रयास-कालेषु स्वप्राणान् त्यक्तवन्त:।

मर्यादापुरुषोत्तमो रामो न केवलमस्माकमास्थाविषयोऽपितु ऐतिहासिक आदर्शस्वरूप:। आतश्च भारतीयसंविधानस्य मूलप्रतौ पुष्पकविमानमधिरूढस्य वैदेहीलक्ष्मणयुतस्य नीलसरोजकोमल-रुचे: श्रीरामचन्द्रस्य रेखाचित्रं समुट्टंकितम्। मनो-वाक्-कायै राष्ट्रहितैकव्रती श्रीनरेन्द्रमोदी प्रधानमन्त्रित्वेन भारतवर्षस्य शासकोऽधुना। अस्यैव शासनकाले मुख्यन्यायाधीशस्य श्रीरञ्जनगोगोई-महोयस्याध्यक्ष्ये न्यायमूर्त्तीनां श्री एस.ए. बोबडे-डी.वाई. चन्द्रचूड-अशोकभूषण-एस.ए. नजीरमहोदयानां पञ्चानां संविधानपीठं निरन्तरं राम-मन्दिर-बाबरी मस्जिदविवादमपाकर्तुं चत्वारिंशद् दिनानि यावद् वाक्कीलानां (Advocates) तर्कानशृणोत्। 09 नवम्बर, 2019 ईशवीयदिनाङ्के तदानीन्तनो मुख्यन्यायाधीश: सत्यपक्षाबलम्वी श्रीरञ्जन-गोगोई-महोदय-स्तटस्थरूपेण सर्वसम्मतं संविधानपीठनिर्णयं पूर्णरूपेण श्रीराममन्दिरपक्षे श्रावितवान्। इत्थं धार्मिकस्थलजुनितविवादस्य पटाक्षेपो भव्यराममन्दिरस्य पुनर्निर्माणाय मार्गश्च प्रशस्तो जात:।

तदेवं सर्वोच्चन्यायालयस्य निर्णयं शिरोधार्य भारतशासनद्वारा 'श्रीरामजन्मभूमितीर्थक्षेत्र'नाम्नैको न्यास: (Trust) संस्थापित:। तस्मै भावि-श्रीराम-मन्दिरनिर्माणाय दायित्वं प्रादात्। स चायं न्यास: तत्परो भूत्वा 05 अगस्त, 2020 दिनाङ्के प्रधानमन्त्रिणां श्रीनरेन्द्रमोदीमहाभागानां करकमलै: श्रीराम-मन्दिर-पुनर्निर्माणार्थं भूमिपूजनस्य सत्कार्यं कारितवान्। न्यासोऽयं भव्यमन्दिरनिर्माणार्थं धनसमर्पणाभियानं 15 जनवरी 2021 त: 27 फरवरी 2021 पर्यन्तं चत्वारिंशद्- दिनानि निर्धारितवान्। एतन्मध्ये प्रायेण 2500 कोटिरूप्यकाणि आशातीतरूपेण आस्थालुभि: सोत्साहं समर्पितानि। यथाकालमविलम्बेन भव्यरामन्दिरस्य कार्यमपि सेत्स्यतीत्याशास्महे।

**वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे**
**मध्ये पुष्पकमासने मणिमये वीरासने सुस्थितम्।**
**अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्य: परम्।**
**व्याख्यातं भरतादिभि: परिवृतं रामं भजे श्यामलम्।।**

इति प्रार्थयन् 2078 तमे श्रीरामनवम्युपेते नवसंवत्सरे सादरमभिनन्दति-

**व्याकरणपीठाध्यक्षचर:, जगद्गुरु-रामानन्दाचार्य-**
**राजस्थान-संस्कृत-विश्वविद्यालय:, जयपुरम्**
**दूरभाषाङ्क: 8386943655**

# श्रीरामजन्मभूमिसंघर्षगाथा

❑ डॉ. नाथूलालसुमनः

**कोशलो नाम मुदितः स्फीतो जनपदो महान्।**
**निविष्टः सरयूतीरे प्रभूतधनधान्यवान्[1]।।**
**अयोध्या नाम नगरी तत्रासील्लोकविश्रुता।**
**मनुना मानवेन्द्रेण सा पुरी निर्मिता स्वयम्[2]।।**
**तां तु राजा दशरथो महाराष्ट्रविवर्धनः।**
**पुरीमावासयामास दिवि देवपतिर्यथा[3]।।**

सरयूतीरे कोशलप्रदेशस्य राजधानी अयोध्या वैवस्वतमनुना निर्मिता। कालक्रमेण दशरथ अयोध्यायाः राजा बभूव। दशरथस्य ज्येष्ठमहिष्याः पुत्ररूपेण श्रीरामो जनिमलभत। श्रीरामस्य दिव्यधाम- प्रस्थानकाले अयोध्या वासिनोऽपि सरयूजले निमग्नाः-

**ततः सर्वाः प्रकृतयो हृष्टपुष्टजनावृताः।**
**गच्छन्तमनुगच्छन्ति राघवं गुणरञ्जिताः[4]।।**

एवमयोध्या जनशून्या जाता। अनन्तरं राजा **ऋषभः** अयोध्यायाः पुनर्निर्माणं कारितवान् -

**अयोध्यापि पुरी रम्या, शून्या वर्षगणान् बहून्।**
**ऋषभं प्राप्य राजानं निवासमुपयास्यति[5]।।**

उज्जयिनीनरेशः विक्रमादित्यः स्वशासनकाले अयोध्यायां श्रीरामस्य विशालं मंदिरं, कूपं, सरोवरं, प्रासादञ्च निर्मापितवान्। मंदिरनिर्माणं **'कसौटी'** इत्याख्यानां 84 प्रस्तरस्तम्भानामुपरि कृतम्। आक्रमणकारी **सालारमसूदः** ख्रिस्तस्य 1033 तमे वर्षे अयोध्याम् आक्रमत्। मंदिरविध्वंसनं कृत्वा तस्य गमनकाले 'बहराइच' स्थाने पराक्रमी राजा **सुहेलदेवः** सालारमसूदमपि हतवान्। अनन्तरं गहडवालवंशीयाः राजानः श्रीराममंदिरस्य पुनर्निर्माणं कृतवन्तः। अग्रेऽपि मुगलशासकाः श्रीरामजन्मभूमिमंदिरम् अयोध्याञ्च नाशयितुं प्रयासरताः आसन्। अन्ततोगत्वा ख्रिस्तस्य 1522 तमे वर्षे बाबरसेनापतिः **मीरबाँकी** अयोध्याम् आक्रमत्। इतिहासकारः **कनिंघमः** लिखति पञ्चदशदिवसात्मके युद्धे 1 लक्ष 74 सहस्रहिन्दूनां बलिदानानन्तरं तोपाख्यास्त्रस्य गोलकैः मंदिरध्वंसनं कृतम्। यद्यपि **मीरबंकी** तत्र मस्जिदनिर्माणस्य प्रयासं कृतवान् किन्तु हिन्दू-समाजस्य विरोधकारणतः सफलो नैव जातः। केवलम् एकस्य भवनस्य एव निर्माणं कर्तुं पारितवान्। तत्र जलस्थानम् (वजूनिमित्तं) अजानस्थानञ्च निर्मातुं न शक्तवान्। भवनस्य बाह्यभित्तौ एकं प्रस्तरशिलालेखं स्थापितवान्, तत्र फारसी-लिप्यामुत्कीर्णम् आसीत् ''फरिस्तों का अवतरणस्थल'' इति। मर्यादापुरुषोत्तमः **श्रीरामः** भारतराष्ट्रस्य श्रद्धायाः प्रतीकोऽस्ति, अतएव महात्मा गान्धिरपि रामराज्यस्य





कल्पनाम् अकरोत्। अस्माकं **संविधानस्य मूलप्रतौ** पुष्पकविमानाधिष्ठितस्य जानकीलक्ष्मणसहितस्य **श्रीरामस्य रेखाचित्रम्** अंकितम् अस्ति। राष्ट्रस्य

मानबिन्दुं श्रीरामजन्मभूमिं पुनरपि प्राप्तुं हिन्दूसमाजोऽपि सततसंघर्षं कृतवान्। बाबरशासन-कालादारभ्य आंग्लशासनपर्यन्तम् अनेके राजानः, सन्यासिनः हिन्दूजनता च 76 वारं युद्धानि कृतवन्तः। एतेषु युद्धेषु प्रायशः सार्धत्रिलक्षं जनाः स्वप्राणान् अर्पितवन्तः। औरंगजेबकाले श्री गुरुगोविन्दसिंहोऽपि युद्धं कृतवान्।

आंग्लशासनकालस्य अंतिमदिनेषु मीरबांकी-निर्मितस्य भवनस्य सुरक्षार्थं प्रहरी नियुक्तः। स्वतन्त्रता-प्राप्त्यनन्तरमपि एषः क्रमः प्राचलत्। 22.12.1949 दिने तस्मिन् भवने एकः चमत्कारः घटितः। सुरक्षा- प्रहरी सूचितवान् यत् रात्रौ दिव्यप्रकाशेन तस्य नेत्रे निमीलिते। किञ्चित्कालानन्तरं स दृष्टवान् यत् तत्र श्रीरामस्य बालकरूपस्य मूर्तिः प्रकटिता, शतशः जनाः दर्शनार्थमपि आगतवन्तः। भवनस्य बहिर्भागे रामचत्वरे अखण्ड-कीर्तनमपि प्रारब्धम्। परस्परकलहं दूरीकर्तुं जिलाधिकारिणा भवनस्य मुख्यद्वारं पिहितं, चत्वारः अर्चकाः एको भण्डारपालश्च केवलं पूजानिमित्तं लघुद्वार माध्ययेन अन्तःगन्तुम् अनुमताः। अन्येषां प्रवेशः वर्जितः। ख्रिस्तस्य **1983 तमे** वर्षे मुजफ्फरनगर आयोजिते हिन्दूसम्मेलने श्रीरामजन्मभूमि अयोध्या, श्रीकृष्णजन्मभूमिः मथुरा, काशीविश्वनाथमंदिरञ्च इत्येतेषां मुक्तिप्रस्तावः सर्वप्रथमं पारितः। हिन्दूसमाजस्य सततसंघर्षकारणेन न्यायालयस्य आदेशद्वारा 1 फरवरी 1986 दिने श्रीरामजन्मभूमेः द्वारं हिन्दूसमाजाय अनावृतम्। सोमनाथमंदिरस्य प्रारूपनिर्मातुः पौत्रः श्रीचन्द्रकान्तसोमपुरा श्रीरामजन्मभूमिमंदिरस्य प्रारूप-निर्माणं कृतवान्। ख्रिस्तस्य 1989 तमे वर्षे जनवरीमासे प्रयागकुम्भमेलापके लक्षावधिसन्यासिनां रामभक्तानाञ्च मध्ये पूज्यस्य **देवरहाबाबामहोदयस्य** उपस्थितौ 10 नवम्बर 1989 दिने राममंदिरशिलान्यासस्य घोषणा कृता।

शिलान्यासतः पूर्वं मंदिरनिर्माणस्य संदेशं प्रतिजनं प्रापयितुं 30 सितम्बर 1989 दिने सम्पूर्णदेशे रामशिलापूजनस्य योजना कृता। प्रायशः पादोनत्रिलक्ष (2.75 लाख) ग्रामेभ्यः पूजिताः रामशिलाः अयोध्यां प्रेषिताः। विदेशस्थाः भारतीया अपि रामशिलाः प्रेषितवन्तः। 10 नवम्बर 1989 दिने पूज्यानाम् अवेद्यनाथस्वामिवामदेव-रामचन्द्रपरमहंससदृशानां नेतृत्वे शंखध्वनिना मंत्रोच्चारेण सह बिहारप्रदेशवास्त-व्यस्य दलितरामभक्तस्य श्रीकामेश्वरचौपालस्य हस्ताभ्यां शिलान्यासकार्यं सम्पन्नम्। शिलान्यासादनन्तरं जिलाधिकारिण आज्ञया निर्माणकार्यं स्थगितम्। किन्तु शासनपक्षतः सकारात्मकप्रत्युत्तरस्य अभावे सन्तसमाजेन ज्योतिष्पीठशंकराचार्याणां स्वामिवासुदेवानन्दसरस्वती-महाराजानाम् अध्यक्षतायां श्रीरामकारसेवासमितिघटनं कृत्वा **30 अक्टूबर 1990** दिनादारभ्य मंदिरनिर्माणार्थं कारसेवां प्रारब्धुं घोषणा कृता। मंदिरनिर्माणस्य संकल्पं प्रतिगृहं यावत् प्रापयितुं दीपावल्या अवसरे प्रतिग्रामं रामज्योतिः प्रेषितम्। 30 अक्टूबरतः पूर्वमेव शासनद्वारा कारसेवाकानाम् अयोध्यागमनं बाधितम्। गमनागमन-साधनानि अवरोधितानि, अयोध्यायां निषेधाज्ञा स्थापिता। तथापि येन-केन प्रकारेण सहस्रशः कारसेवकाः अयोध्यामागताः। पूर्वनिर्धारितदिने पूज्यैः सन्तजनैः सह कारसेवकाः कारसेवां कृतवन्तः। 2 नवम्बर दिने उत्तरप्रदेशशासनद्वारा भुशुण्डीगुलिकास्त्रैः प्रायशः 25 कारसेवकाः बलिपथं नीताः शतशः व्रणिताश्च। 10 दिसम्बरपर्यन्तं 48 कारसेवकाः '**रामकाज**' निमित्तं दिवं प्रयाताः। कारसेवकानां बलिदानेन मंदिरनिर्माणस्य संकल्पः इतोऽपि द्रढीकृतः।

1992 तमे वर्षे उत्तरप्रदेशशासनद्वारा श्रीरामजन्म-भूमिपरिसरे **2.77** एकड़ परिमितभूखण्डस्य अधिग्रहणं कृत्वा तस्य समतलीकरणकार्यं प्रारब्धं तदा मंदिरस्य अनेके भग्नावशेषाः प्राप्ताः। अनन्तरं 9 जुलाई 1992 तः शिलान्यासस्थले आधारनिर्माणकार्यं प्रारब्धं संत-समाजेन। किन्तु 15 दिनानन्तरं प्रधानमंत्रिणः परामर्शं स्वीकृत्य आधारनिर्माणकार्यं स्थगितम्। यद्यपि समस्या-समाधानार्थं प्रधानमंत्रिद्वारा मासत्रयस्य समयः याचितः किन्तु निर्धारितसमयावधौ समस्यासमाधानं नैव जातम्। अतएव संतसमाजेन घोषणा कृता यत् **6 दिसम्बर 1992** दिनात् पुनः कारसेवा भविष्यति। सर्वोच्चन्यायालयेन अपि सांकेतिकसेवायाः अनुमतिः प्रदत्ता। 6 दिसम्बरतः पूर्वमेव प्रायशः 4 लक्षपरिमिताः कारसेवकाः अयोध्यां प्राप्तवन्तः। निर्धारितसमये पूजनं प्रारब्धं तदानीमेव कारसेवकानां समूहः सुरक्षाबलैः स्थापितानाम् अवरोधानां शृंखलाम् अतिक्रम्य विवादितभवनं प्रति आयातः। मंचोपरि स्थितः नेतृगणः संतसमाजश्च ध्वनिविस्तारकमाध्यमेन कारसेवकान् नियंत्रयितुं बहुप्रयासान् कृतवन्तः, किन्तु सर्वं निष्फलं जातम्। विवादितभवनस्य सुरक्षार्थं स्थापितान् विशालकाष्ठ-



दण्डान् दृढलोहदण्डान् च उन्मूल्य तेषां साहाय्येन कारसेवकैः सायंकाले पञ्चवादनपर्यन्तं विवादितभवनं पूर्णतया ध्वस्तम्। भवनस्य विध्वंसात् पूर्वमेव श्रीरामस्य विग्रहः अन्यत्र स्थापितः। भवनस्य ध्वंसावशेषान् समतलीकृत्य एकं चत्वरं (चबूतरा) निर्माय तदुपरि श्रीरामस्य विग्रहः पुनः स्थापितः, विधिपूर्वकम् अर्चना च प्रारब्धा। **8 दिसम्बर 1992** दिने सुरक्षाबलैः सम्पूर्णपरिसरः पुनरपि स्वायत्तीकृतः। अनन्तरं न्यायालयस्य आज्ञया अस्मिन् अस्थायिमंदिरे दर्शनपूजनस्य अनुमतिरपि प्राप्ता। श्रीराममंदिरस्य प्रकरणं सर्वदैव स्मृतिपथे स्थापयितुं संतसमाजेन समये-समये समाजमध्ये विविधाः गतिविधयः आयोजिताः।

विवादितभवनस्य विध्वंसानन्तरं श्रीराममंदिरस्य प्रकरणं पूर्वं उच्चन्यायालये अनन्तरं सर्वोच्चन्यायालये च विचाराधीनम् आसीत्। अत्रान्तरे 27 फरवरी 2002 दिने गुर्जरप्रदेशे **गोधरानामके** रेलस्थानके एकस्मिन् रेलयाने अग्निकाण्डं जातम्, अस्मिन् काण्डे 59 कारसेवकाः भस्मीभूताः, 5 जुलाई 2005 दिने श्रीरामजन्मभूमिपरिसरे 5 आतंकवादिनोऽपि प्रविष्टाः ये सुरक्षाबलैः मारिताः। सर्वोच्चन्यायालयस्य पंचन्यायाधीशानां पीठेन **9 नवम्बर 2019 दिने राममंदिरस्य पक्षे स्वनिर्णयः श्रावितः।** न्यायालयीयनिर्णयस्य अनुपालनार्थं भारतशासनेन **''श्रीरामजन्मभूमितीर्थक्षेत्र''** इति नाम्ना एकं न्यासं संस्थाप्य तस्मै मंदिरनिर्माणस्य दायित्वं प्रदत्तम्। प्रधानमंत्री **श्रीनरेन्द्रमोदी**, राष्ट्रीयस्वयंसेवकसंघस्य सरसंघचालकः पूज्यः **मोहनभागवतः** उत्तरप्रदेशमुख्य-मंत्री **आदित्यनाथयोगी**, सन्तसमाजस्य प्रतिनिधयश्च 5 अगस्त 2020 दिने भूमिपूजनकार्यक्रमे उपस्थिता आसन्। मंदिरनिर्माणार्थं न्यासेन धनसमर्पणस्य आह्वानं कृतम्। 15 जनवरी 2021 तः 27 फरवरी 2021 पर्यन्तं 44 दिनेषु धनसमर्पणाभियाने प्रायशः 2500 कोटिरूप्यकाणि



समाजैः समर्पितानि। मंदिरनिर्माणकार्यं प्रारब्धम्। आगामिनि 2-3 वर्षाभ्यन्तरे मंदिरनिर्माणस्य संकल्पः पूर्णतां यास्यतीति आशास्महे।

**पादटिप्पण्यः**

1. वाल्मीकिरामायणम्, बालकाण्डम्।5/5

2. तदेव, 5/6

3. तदेव, 5/9

4. वा.रा. उत्तरकाण्डम्, 109/14

इतोऽपि पद्यानि प्राप्यन्ते-

ततः सस्त्रीपुमांसस्ते सपक्षिपशुबान्धवाः।
राघवस्यानुगाः सर्वे दृष्टा विगतकल्मषाः।।
तदेव, 109/15

भेजिरे सरयूं सर्वे हर्षपूर्णाश्रुविक्लवाः।
अवगाह्याप्सु यो यो वै प्राणांस्त्यक्त्वा प्रहृष्टवत्।।
तदेव, 110/2

मानुषं देहमुत्सृज्य विमानं सोऽध्यरोहत।।
तदेव, 110/24

अध्यात्मरामायणेऽपि उत्तरकाण्डे-

अद्य चाहं गमिष्यामि लक्ष्मणस्य पदानुगः।। 9/2

ततः प्राञ्जलयः प्रोचुः प्रजा भक्त्या रघूद्वहम्।। 9/11

गन्तुमिच्छसि यत्र त्वमनुगच्छामहे वयम्।।12

गच्छन्तमेवानुगता जनास्ते, सपुत्रदाराः सह बन्धुवर्गैः।

अनावृतद्वारमिवापवर्गं, रामं व्रजन्तं ययुराप्तकामाः।

सान्तःपुरः सानुचरः सभार्यः शत्रुघ्नयुक्तो भरतोऽनुयातः।।9/42

ततो निमग्नाः सरयूजलेषु, नराः परित्यज्य मनुष्यदेहम्।।9/65

5. वा. रा. उत्तरकाण्डम्,। 111/10

कालिदासस्य मतेन रामपुत्रः कुशः अयोध्यायाः पुनर्निर्माणं कारितवान्-

तां शिल्पिसंघाः प्रभुणा नियुक्तास्तथागतां
सम्भृतसाधनत्वात्। पुरं नवीचक्रुरपां विसर्गान्मेघा
निदाघग्लपितामिवोर्वीम्।। रघुवंशम् 16/ 38

रात्रौ अयोध्यानगर्याः अधिदेवता कुशमादिष्टवती, अतः तदाज्ञया कुशः अयोध्यायाः पुनर्निर्माणं कारितवान्।

(मुख्यस्रोतः -
'कारसेवा से कारसेवा तक' -गोपालशर्मा,
(उपाध्यक्षः, भारतीयप्रचारसंस्थानम्, जयपुरम्)



**धर्माधिकारिणः पण्डितवेणीमाधवशर्मणम् राष्ट्रभक्तिपरायणानां राजस्थान-प्रचाच्यविद्याप्रतिष्ठानतः सेवानिवृत्तानां 'भारती' 'स्वरमंगला' इत्युभयोः संस्कृपत्रिकयोः परिमार्जितसंस्कृते निरन्तरं शोधलेखाः प्रकाशिताः भवन्तिस्म। पञ्चाशीतिवर्षदेशीया इमे वैयाकरणविद्वांसः 02 मार्च 2021 दिनाङ्के दिवं प्रयाताः इति शोकनिमग्नो 'भारती' संस्कृतपत्रिकापरिवारः श्रद्धाञ्जलीन् अर्पयति।**

**- सम्पादकः**

# दैवं-पुरुषार्थश्च

**( श्रीमद्वाल्मकीयरामायणानुसारम् )**

❑ प्रोफेसर सोहनलालशर्मा

दैवपर: पुरुषार्थपरश्चात्र पक्षद्वयम्। तत्र दैवाधीनं जगत् सर्वम्, दैवं हि दुरतिक्रमम्, भाग्यं फलति सर्वत्र नहि विद्या नहि पौरुषम् इति दैवपक्षपातिनस्तथा दैवेन देयमिति कापुरुषा: वदन्ति, उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीरिति पुरुषार्थपक्षकाराश्च ब्रुवन्ति।

संचित-प्रारब्ध-क्रियमाणत्वेन कर्मणां त्रैविध्यमुक्तम्। **संचितेन** प्रारब्धस्य निर्माणं जायते। यस्य फलं न भुक्तं तदेव संचितम्। पूर्वजन्मनीहजन्मनि च कृतानि कर्माण्यत्र गृह्यन्ते। पूर्वजन्मकृतं कर्म तद्दैवमिति-**प्रारब्धकर्म**। इह जन्मनि शुभमशुभं वा यद् घटते यश्चानियन्त्रित: स एव प्रारब्ध:। प्रारब्धस्त्वस्माकं कृतं कर्म एव। कृतं कर्म कदा फलितं भविष्यतीत्यनिश्चितम्। कृतानां पापपुण्यकर्मणां न्यूनाधिक्याधारेण फल-प्राप्तिर्भवति। प्रारब्धकर्मणां दुष्प्रभाव: जपेन, तपसा यज्ञादिभिश्च न्यूनं कर्तुं शक्यते किन्तु पूर्णत: स न विनश्यति। इह जन्मनि पापं पुण्यं वा यत् कर्म क्रियते तदैव **क्रियमाण**मुच्यते। क्रियमाणं कर्म संचितकर्मणि संयुज्यते-एतेन दैवं निर्मीयते। एकस्य कर्मण: फलमुक्त्यनन्तरं द्वितीयस्य कृतस्य कर्मण: फलं भोगायापतति-एवं जीवने ''चक्रारपंक्तिरिव गच्छति भाग्यपंक्ति:।''

''नहि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्'', ''नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मण:'', ''कार्यं कर्म समाचरे''ति श्रीमद्भगवद्गीतायां कथयता भगवता ''किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिता:'', ''गहना कर्मणो गति:'' ''उत्सीदेयुरिमे लोका: न कुर्यां कर्म चेदह''मिति कर्मण: गहनत्वमावश्यकत्वमप्युक्तम्। सुकृतकर्मण: सात्त्विकं, रजस: दु:खं तमसश्च फलम-ज्ञानमेवं कर्मणां प्रकारास्तथा तेषां फलमपि वर्णितम्। पुनरपि कथितं ''अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मण: फलम्'' तथा ''ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना'' कर्मणां सिद्धौ ''दैवं चैवात्र पञ्चमम्'' ''कर्मण्ये-वाधिकारस्ते मा फलेषु कदाचन, मा कर्मफलहेतुर्भू: मा ते सङ्गोऽस्त्वकर्मणि'' ''कार्यते ह्यवश: कर्म सर्व: प्रकृतिजैर्गुणै''रित्यादिभि: कर्मणां विषये तत्र गहनं चिन्तितम्। परमत्र विस्तरभयान्नाधिकं विलिख्यते।

**दैव-पुरुषार्थयो: कस्य प्राबल्यमिति** श्रीमद्-वाल्मीकीयरामायणानुसारं विविच्यते।

(1) गुरुणा वसिष्ठेन प्रत्याख्यात: गुरुपुत्रैश्च चाण्डालत्वेन शप्त: त्रिशङ्कु: सदेहं स्वर्गं गन्तुं तदर्थं यज्ञं कर्तुं ब्रह्मर्षिं विश्वामित्रं विनिवेदयति मया गुरव: नैव परितुष्टा: गुरुपुत्राणां शापाच्चाहं चाण्डालत्वं गत:। एतदर्थं मया कृत: पुरुषार्थ: दैवेन हत:। अतोऽहं ब्रवीमि-

**''दैवमेव परं मन्ये पौरुषं तु निरर्थकम्।**
**दैवेनाक्रम्यते सर्वं दैवं हि परमा गति:।।''**

बालकाण्डम्, 58/33

एवं प्रार्थित: विश्वामित्र: त्रिशङ्कुं स्वर्गं गमयति। विश्वामित्रकृतेन पुरुषार्थेन दैवं पराजितमभूत्।

(2) श्रीराम: लक्ष्मणाय ब्रूते-लक्ष्मण, मत्प्रवासे (वनगमने) दैवादन्यन्न कारणम्। वनवासार्थं नृपं प्रेरयितुं कैकेय्या कृत: कटुवचनानां प्रयोग: ममाभिषेक-निवृत्तिश्चाहं ''नान्यद् दैवात् समर्थये।'' (अयोध्या-काण्डम् 22/18)/कदाचित् काचिदप्यविचारिता जीवने या सुखदु:खामित्का घटना घटते-सा तु दैवप्रतिपादितैव। प्राणिन: देवाश्च दैवविधानं निवारयितुमसमर्था: भवन्ति-''यदचिन्त्यं तु तद् दैवं भूतेष्वपि न हन्यते'' (अयो. 22/20)/सौमित्रे! दैवेन सह योद्धुं न कोऽपि प्रभवति। सुखदु:खादिप्राप्त्यनन्तरमेव दैवप्रभाव: ज्ञायते-

**''कश्च दैवेन सौमित्रे योद्धुमुत्सहते पुमान्।**
**यस्य नु ग्रहणं किञ्चित् कर्मणोऽन्यत्र दृश्यते।।''**

(अयो. 22/21)

सुखदु:खे, भयक्रोधौ, लाभालाभावुत्पत्तिविनाशौ तथा यदन्यश्चापि परिणाम: घटते प्राप्यते वा परं तस्य कारणञ्च नैव ज्ञायते, तत् सर्वं दैवकृतं विज्ञेयम्-

**''सुखदु:खे भयक्रोधौ लाभालाभौ भवाभवौ।**
**यस्य किञ्चित्तथाभूतं ननु दैवस्य कर्म तत्।।''**

(अयो. 22/22)

कदाचिदपि विचारसरणिमप्राप्ता तथाऽऽकस्मिक-रूपेण संप्राप्ता या घटना तथा प्रयत्नैरारम्भितस्य कर्मण अकस्मादेवावरोधेन नूत्नकाण्डस्योपस्थितिर्यत्र जायते सा क्रिया दैवसम्पादिता एवाहं मन्ये-

**''असंकल्पितमेवेह यदकस्मात् प्रवर्तते।**
**निवृत्यारब्धमारम्भैः ननु दैवस्य कर्म तत्।।''**

(अयो. 22/24)

लक्ष्मण! काममन्युविवशा: तपस्विन: ऋषयश्चापि स्वमर्यादया भ्रंशिता: जायन्ते-तत्रापि दैवप्रकोप एव कारणम्। ममाभिषेकनिवारणे नहि मदीया यवीयसी माता कैकेयी न च पिता कारणं, कारणन्त्वत्र दैवमेव-

**''जानासि दैवं हि तथा प्रभावम्।''** (अयो. 22/30)/

(3) श्रुत्वैतद्रामवचनं लक्ष्मण: दैवं खण्डयति पुरुषार्थञ्च पोषयति निगदति च-भ्रात:!**''किं नाम कृपणं दैवमशक्तमभिशंससि''** (अयो. 23/83)/ कातरोऽशक्तश्चैव दैवेन देयमिति कथयति, वीर: साहिसिकश्च दैवं न भजते-

**''विक्लवो वीर्यहीनश्च स दैवमनुवर्तते।**
**वीराः सम्भावितात्मानो न दैवं पर्युपासते।।''**

(अयो. 23/16)

यश्च विपरीतं दैवं पुरुषार्थेन रोद्धुं समर्थ:, स दैवेन प्रबाधितोऽपि दु:खितो न भवति-

**''दैवं पुरुषकारेण यः समर्थः प्रबाधितुम्।**
**न दैवेन विपन्नार्थः पुरुषः सोऽवसीदति।।''**

(अयो. 23/17)

अत: लोकपाला, त्रयो लोका:, पिता तथान्ये च त्वदीयं राज्याभिषेकं निवारयितुं समर्था: न भविष्यन्ति। ममोग्रपुरुषार्थसमक्षं दैवबलं दु:खाय न प्रभविष्यति-

**''मद्बलेन विरुद्धाय न स्याद् दैवबलं तथा।**
**प्रभविष्यति दु:खाय यथोग्रं पौरुषं मम।''**

(अयो.23/24)

अहमेकोऽपि बलात् विपरीतान् महीपालानन्यांश्च निवारयितुमलम्। परन्तु पौरुषपूर्णं लक्ष्मणवाक्यं श्रुत्वा श्रीराम: पित्रोर्वचनपालनमेव सन्मार्ग: **''पित्रोर्वचने व्यवस्थितं निबोध मामेव हि सौम्य सत्पथ:''** (अयो. 23/41) इति कथयित्वा लक्ष्मणमेतत् कर्तुं निवारयति। फलितमिदं यत् यदि श्रीरामोऽपि साहाय्य: स्यात्तदा लक्ष्मणनिर्दिष्टेन कृतेन पुरुषार्थेन संभवत: तस्य वनगमनं निरुद्धयेत-परन्तु श्रीरामस्य मतानुसारं नैतत् समीचीन-मासीत्।

(4) खिन्ना कौसल्यापि **''कृतान्तस्य गतिः पुत्र दुर्विभाव्या सदा भुवि''** (अयो. 24/35)। अत: गच्छेदानीं वनमिति श्रीरामं निर्दिशति। अत्रापि दैवविधानमेव प्रबलं प्रतीयते।

(5) श्रीरामेण साकमेव वनं गन्तुमुद्यता सीतापि वदति-सर्वो हि जन: स्वकृतपापपुण्यकर्मणां शुभाशुभं फलं भाग्यानुसारमेव भुङ्क्ते-

**''आर्यपुत्र पिता माता भ्राता पुत्रस्तथा स्नुषा।**
**स्वानि पुण्यानि भुञ्जानाः स्वं स्वं भाग्यमुपासते।।''**

(अयो. 27.04)

(6) श्रीरामस्य वनगमनानन्तरं शोकार्त: दशरथ: कौसल्यां श्रवणवृत्तं श्रावयित्वा निगदति-कौसल्ये! कर्ता यादृशं शुभाशुभं कर्म करोति, तादृशं फलमवश्यमेव प्राप्नोति-

**''यदाचरति कल्याणि शुभं वा यदि वाशुभम्।**
**तदेव लभते भद्रे कर्ता कर्मजमात्मन:।।''**

(अयो. 63/06)

यस्तु फलमविचार्य केवलं कर्म करोति,- स फलप्राप्त्यनन्तरं शोचति, किमिदं मया कृतं येनेदमशुभं फलं प्राप्तम्-तत: किम्, तदा तस्य दशा किंशुकसेचक इव भवति-

**''अविज्ञाय फलं यो हि कर्मत्वेनानुधावति।**
**स शोचेत् फलवेलायां यथा किंशुकसेचकः।।''**

(अयो. 63/09)

(7) सीताविरहे व्याकुलं श्रीरामं लक्ष्मणः प्रबोधयति- नरेण सर्वदा सोत्साहवता भाव्यम्। उत्साह एव बलवान्। उत्साहेन विपरीतं फलमप्यनुकूलं कर्तुं शक्यते। एतेन दुःखनिवृत्तिर्जायते-

**''उत्साहो बलवानार्य नास्त्युत्साहात् परं बलम्।**
**सोत्साहस्य हि लोकेषु न किञ्चिदपि दुर्लभम्।।''**

(किष्कि. 01/121)

सोत्साहिनो विपदि धैर्यं न त्यजन्ति, ते दुःखसन्तप्ताः न भवन्ति- **''उत्साहवन्तः पुरुषाः नावसीदन्ति कर्मसु।''** (किष्कि. 01/22)।

(8) मृतं बालिनं दृष्ट्वा विलपन्ती तारापि विधिना विपरीतं फलं दत्तमिति कथयन्ती विधिमेव निन्दति। दुःखितां तारां प्रबोधयन् श्रीरामः नियतिपक्षमेवाश्रयते। नियतिरेव शुभाशुभं फलं ददाति। नियतिरेव प्राणिनं शुभाशुभकर्मसु नियोजयति-

**''नियतिः कारणं लोके नियतिः कर्मसाधनम्।**
**नियतिः सर्वभूतानां नियोगेष्विह कारणम्।।''**

(किष्कि. 25/06)

नहि कोऽपि स्वान्तन्त्र्येण कर्म कर्तुं समर्थः। न हि कोऽपि स्वभावमतिवर्तते, कालस्य (दैवस्य) न कोऽपि बन्धुः न च मित्रं, न सम्बन्धी। तत्र पराक्रमोऽपि निष्प्रभो भवति- -

**''न कालस्यास्ति बन्धुत्वं न हेतुर्न पराक्रमः।**
**न मित्रज्ञातिसम्बन्धः कारणं नात्मनो वशः।।''**

(किष्कि. 25/07)

(9) दुष्पारं सागरं दृष्ट्वा वानराः विषीदन्ति-तान् विषण्णान् अङ्गदः प्रेरयन् भाषते- यः पराक्रमावसरे विषादग्रस्तो भवति-तस्य तेजो नश्यति। तेजसा हीनश्च पौरुषं कर्म कर्तुं न प्रभवति। पराक्रमेण सर्वं सिद्ध्यति-

**यो विषादं प्रसहते विक्रमे समुपस्थिते।**
**तेजसा तस्य हीनस्य पुरुषार्थो न सिद्ध्यति।।**

(किष्कि. 64/10)

(10) लङ्कायां प्रियविरहे दुःखार्तां सीतां विलोक्य चिन्तातुरो हनुमान् विचारयति- अस्याः दुःखस्य कारणं काल (दैवम्) एवास्ति, अन्यथा यस्य लक्ष्मणसदृशः महावीरः भ्राता, सर्वं कर्तुं समर्थः स्वयं श्रीरामः, तस्य प्रिया यदि दुःखार्ता चेत्, सत्यं हि ''कालो हि दुरतिक्रमः'' -

**''मान्या गुरुविनीतस्य लक्ष्मणस्य गुरुप्रिया।**
**यदि सीता हि दुःखार्ता कालो हि दुरतिक्रमः।।''**

(सुन्दर. 16/03)

(11) प्रियविरहे प्राणान् परित्यागायोद्यता सीताऽपि भणति-

**''नूनं स कालो मृगरूपधारी**
**मामल्पभाग्यां लुलुभे तदानीम्।**
**यत्रार्यपुत्रौ विससर्ज मूढा**
**रामानुजं लक्ष्मणपूर्वजं च।।''** (सुन्दर. 28/10)

लोभवशङ्गताऽहं सुवर्णमृगमानेतुमार्यपुत्रं लक्ष्मणञ्च वने प्रेषितवती। सः सुवर्णमृगः मत्कृते काल (नियतिः) एवासीत्।

यज्जीवने दारुणं दुःखमैश्वर्यं वा प्राप्यते, मन्ये कृतान्तः तस्यां दिशि प्राणिनं रज्ज्वेव बद्ध्वा परिकर्षन्नयति-

**''ऐश्वर्ये वा सुविस्तीर्णे व्यसने वा सुदारुणे।**
**रज्ज्वेव पुरुषं बद्ध्वा कृतान्तः परिकर्षति।।''**

(सुन्दर. 37/03)

सीता पुनः वदति-हनुमन्! जीवः विधेर्विधानं परिवर्तयितुं समर्थो न भवति। विधिरहो बलवान्, अत एव लक्ष्मणः स्वयमहं श्रीरामश्च व्यसनैर्मोहिता अभवन्-

**''विधिर्नूनमसंहार्यः प्राणिनां प्लवगोत्तम।**
**सौमित्रिं मां च रामं च व्यसनैः पश्य मोहितान्।।''**

(सुन्दर. 37/04)

(12) रणभूमौ शरविद्धौ विसंज्ञौ शयानौ रामलक्ष्मणौ दृष्ट्वा तयोः निधनं वितर्कयन्ती दुःखार्ता सीता विलपति- युद्धे श्रीरामं जेतुं न कोऽपि समर्थः। अहो, कालवश-मापन्नौ रामलक्ष्मणौ रणभूमौ शयाते। दैवज्ञैः पूर्वं मत्कृते यद् भाषितं तत्तु मिथ्यैवाभवत्- विपरीतं यदभवत् तत् कालकृतमेव जाने-

**''न कालस्यातिभारोऽस्ति कृतान्तस्य सुदुर्जयः।**
**यत्र रामः सह भ्रात्रा शेते युधि निपातितः।।''**

(युद्ध. 69/19)

(13) युद्धे सरोषं गर्वितं चातिकायस्य वचः श्रुत्वा मनस्वी लक्ष्मणस्तं ब्रवीति विकत्थनेनालम् त्वं , पराक्रमं प्रदर्शय, कर्मणा शौर्यमुद्घाटय, यः पुरुषार्थपरः स एव शूरः कथितः-

**''कर्मणा सूचयात्मानं न विकत्थितुमर्हसि।**
**पौरुषेण तु यो युक्तः स तु शूर इति स्मृतः।।''**

(युद्ध. 71/59)

(14) सीतावधं श्रुत्वा मूर्च्छितं श्रीरामं लक्ष्मणः ब्रवीति-धर्माचरणेन किं सुखं प्राप्यते। यद्येवं स्यात्तर्हि धर्माचरणहीनः रावणः कथं न नरकं ब्रजेत्? धर्मात्मना भवता दुःखं पापात्मना रावणेन कथं सुखमुपभुज्यते? यश्चाचेतनत्वेन प्रतीकारज्ञानेन शून्यः, अव्यक्तः, असच्च तेन धर्मेणान्यस्य पापात्मनः वध्यत्वेन प्राप्तिः कथं सम्भाव्यते-

**''अदृष्टप्रतिकारेण अव्यक्तेनासता सता।**
**कथं शक्यं परं प्राप्तुं धर्मेणारिविकर्षण।।''**

(युद्ध. 83/24)

(15) इन्द्रजित् लक्ष्मणेन सह योद्धुं लङ्कातः निर्गच्छति-तत्रापि तस्य बलात् समरे गमनं कृतान्तस्य (दैवस्य) प्रेरणा एवासीत्-

**''निर्ययौ नगरात् वीरः कृतान्तबलचोदितः।''**

(युद्ध. 90/11)

(16) महोदर-विरूपाक्षयोर्वधेन स्वबलं क्षीणं दृष्ट्वा रावणः व्यथितो बभूव। अत्र कारणं तद् दैव- (भाग्यं)-वैपरीत्यमेव मनुते-

**''प्रक्षीणं स्वबलं दृष्ट्वा वध्यमानं बलीमुखैः।**
**बभूवास्य व्यथा युद्धं दृष्ट्वा दैवविपर्ययम्।।''**

(युद्ध. 93/03)

(17) रावणवधानन्तरं तस्य स्त्रियः कुरर्य इव विलपन्त्यः कथयन्ति- राक्षसशिरोमणे! युद्धेऽस्मिन् वानराणां, रक्षसां भवतश्च विनाशः दैवयोगेन संप्राप्तः। पराक्रमेण, धनेन, कामेनाज्ञया, शक्त्या च दैवगतिर्न निवारयितुं शक्यते। वयं सर्वे दैवस्य क्रीडनकाः स्मः। दै वेन हतः हन्यत एव-

**''न कामकारः कामं वा तव राक्षसपुङ्गव।**
**दैवं चेष्टयते सर्वं हतं दैवेन हन्यते।।''**

(युद्ध. 93/23)

**''नैवार्थेन न कामेन विक्रमेण न चाज्ञया।**
**शक्या दैवगतिर्लोके निवर्तयितुमुद्यता।।''**

(युद्ध. 93/25)

(18) पीडादातॄणां राक्षसीनां वधं कर्तुमुद्यतं हनुमन्तं निवारयन्ती सीता गदति एताः राक्षसस्य राजाज्ञयैव मां पीडयन्ति स्म। अतः तासां नैवापराधः। मदीयं भाग्यमेव विपरीतमासीत्। पूर्वकृतपापकर्मणामेव दुःखरूपमिदं फलं मया प्राप्तम्। यादृशं कर्म, तादृशं फलं प्राप्यते-

**''भाग्यवैषम्यदोषेण पुरस्तात् दुष्कृतेन च।**
**मयैतत् प्राप्यते सर्वं स्वकृतमुपभुज्यते।।''**

(युद्ध. 113/39-40)

(19) युद्धानन्तरं लङ्कात आनीतां सीतां प्रेक्ष्य श्रीरामः स्वमनोभावमेवं प्रकटी-करोति-संयुगे शत्रुं विजित्य त्वामहं प्राप्तवान्। पौरुषेण यदनुष्ठेयं तत्सर्वं मयानुष्ठितम्। त्वं रावणेनापहृता, दैवात् प्राप्तः दोषः मया पुरुषार्थेन प्रमार्जितः-

**''या त्वं विरहिता नीता चलचित्तेन रक्षसा।**
**दैवसम्पादितो दोषः मानुषेण मया जितः।।''**

(युद्ध.115/05)

पुनश्च वदति- यः पुरुषः प्राप्तमवमानं तेजसा बलेन वा न प्रमार्जति तदा तस्य पुरुषार्थेन को लाभः? वानरैः, विभीषणाङ्गदादिभिः, लक्ष्मणेन मया च कृतेन पौरुषेण दैवः पराजितः।

लङ्काया आनीतां प्राप्तचारित्र्यसंदेहां सीतां राघवः दुर्वचांसि भाषते, श्रुत्वा च सीता वदति-रावणेन मम शरीरस्य स्पर्शः बलात् कृतः-तदाहं विवशा आसम्। एषस्तु दैवकृत एव दोषः -

**''यदहं गात्रसंस्पर्शं गतास्मि विवशा प्रभो।**
**कामकारो न मे तत्र दैवं तत्रापराध्यति।।''**

(युद्ध. 116/08)

(20) राघवादेशात् वने विसृष्टां वाल्मीकेराश्रमं प्रविष्टां सीतां दृष्ट्वा दुःखसंतप्तः लक्ष्मणः सुमन्त्रं कथयति- सारथे! सर्वं कर्तुं समर्थस्य श्रीरामस्यातः परं किं दुःखं भविष्यति? सर्वं दैवकृतमिदं, दैवमनतिक्रमणीयम्-

**''व्यक्तं दैवादहं मन्ये राघवस्य विनाभवम्।**
**वैदेह्या सारथे नित्यं दैवं हि दुरतिक्रमम्।।''**

(उत्तर. 50/04)

सुमन्त्रोऽपि दुर्वाससा पूर्वं भाषितं रहस्यं प्रकटय्य ''दैवं हि-दुरतिक्रममे''व निगदति।

(21) सीतां वने त्यक्त्वा राजभवनं प्रविष्टः लक्ष्मणः खिन्नं श्रीरामं सान्त्वयति-शोकं मा कृथाः, विपरीतेन कालेनैवेदं कृतम्। कालः यथा करोति तथैव भवति। नात्र कार्या विचारणा-

**''मा शुचः पुरुषव्याघ्र कालस्य गतिरीदृशी।**
**त्वद्विधाः न हि शोचन्ति बुद्धिमन्तो मनस्विनः''**

(उत्तर. 52/10)

(22) द्विजशापाद् कृकलाशं गतः राजा नृगः स्वपुत्रं भणति-पुत्र! मानवः पूर्वजन्मकृतकर्मानुसारमेव प्राप्तव्यं वस्तु, स्थानमन्यद् वा प्राप्नोति, यत्र गमनीयं तत्रैव गच्छति, लब्धव्यं सुखं दुःखं वा लभते। अत्र कृतान्त एव मम दुःखस्य कारणमतः मत्कृते संतापं मा कृथाः-

**''कृतान्तः कुशलः पुत्र येनास्मि व्यसनीकृतः।**
**प्राप्तव्यान्येव प्राप्नोति गन्तव्यान्येव गच्छति।।''**

(उत्तर. 54/16)

**''लब्धव्यान्येव लभते सुखानि च दुःखानि च।।''**

(उत्तर. 53/17)

(23) दुर्वाससः शापभयाद् लक्ष्मणः नियमं भङ्क्त्वा श्रीरामं सूचयितुं गच्छति। कालवाक्यानि स्मृत्वा लक्ष्मणस्य वियोगो भवितेति मत्वा श्रीरामः दुःखितो भवति। श्रीरामं दीनं दृष्ट्वा लक्ष्मणः मधुरं ब्रवीति-

**''न सन्तापं महाबाहो मदर्थं कर्तुमर्हसि।**
**पूर्वनिर्माणबद्धा हि कालस्य गतिरीदृशी।।''**

(उत्तर. 106/02)

वसिष्ठोऽप्येवमेव भाषते **''त्यजैनं बलवान् कालो मा प्रतिज्ञां वृथा कृथाः''** (उत्तर. 106/09) एवं लक्ष्मणवसिष्ठयोर्वाक्येष्वपि कालस्य (दैवस्य) बलीयत्वं स्पष्टम्।

प्रोक्तेषु प्रसङ्गेषु त्रिशङ्कुः, श्रीरामः, कौसल्या, सीता, दशरथः, तारा, इन्द्रजित्, रावणः, रावणस्य स्त्रियः, हनुमांश्च प्राप्तस्य दुःखस्य कारणं दैववैपरीत्यमेव स्वीकुर्वन्ति। कुत्रचिल्लक्ष्मणः श्रीरामं पुरुषार्थाय प्रेरयति, कुत्रचिच्च सः ''दैवं हि दुरतिक्रमम्'' ''पूर्वनिर्माणबद्धा हि कालस्य गतिरीदृशीति'' प्रवदन् दैवप्राबल्यमप्या-म्नाति। श्रीरामोऽपि रावणेनापहृतां पुनश्च लङ्कां विजित्य सम्प्राप्तां सीतां ''दैवसम्पादितो दोषः मानुषेण मया जितः'' इति प्रवदन् दैवोपरि पुरुषार्थस्य विजयमपि घोषयति।

प्रारब्धकर्मणः (दैवस्य) दुष्प्रभावः तपसा, जपयज्ञादिभिश्च पुरुषार्थैः किञ्चित् न्यूनं कर्तुं शक्यते किन्तु तस्य दुष्प्रभावः पूर्णतः न विनाशयितुं शक्यः, **''अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभमिति निश्चितम्।**

**सारमिदं यत्'' यादृशं कुरुते कर्म तादृशं फलमश्नुते''** अतः शास्त्रोक्तं कर्म करणीयम्। कृतेन शास्त्रविधानविपरीतकर्मणा हानिः दुःखञ्च जायते। केवलं दैवेन देयमिति मनसि कृत्वा कदापि शास्त्रोक्तं कर्म न त्याज्यम् ''ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तु मिहार्हसि'' (गीता-17/24)

अन्यथा तु- **''क्षुत्परीतो यथा दीनः सारमेयो गृहं गृहम्।**
**चरन् विन्दति यद्दिष्टं दण्डमोदनमेव च।।''**

(भागवतम् 04/29/30) सारमेयस्योदरपूर्त्यर्थ-मितस्ततः भ्रमणमिव यद्वा तद्वा भविष्यत्येवेत्यलम्।

**पूर्वनिदेशकः**
**संस्कृतशिक्षाराजस्थानम्, जयपुरम्**
**मो.: 9829642588, 8946863430**

# ।। मुधमत् पार्थिवँ्रजः ।। [ यजुर्वेदः 13/28 ]

नववत्सरसम्पूर्वा शक्तेरियमुपासना।
श्रीरामफलदाऽस्माकं धन्येयं भारती धरा।।

❑ प्रोफेसर सुरेन्द्रकुमारशर्मा

सुविदितमेवात्र सर्वेषां यत्प्रतिवर्षं चैत्रमासस्य शुक्ले पक्षे प्रतिपत्तिथौ भारतीयोऽयमस्मन्नवसम्वत्सरः प्रवर्तते। एषमोऽपि चैत्रशुक्लपक्षे प्रतिपदायामस्य [13.4.21] शुभारम्भो जायमान इति प्रमोदोत्सवस्यावसरोऽस्माकम्। अस्मिन् सम्वत्सरशुभारम्भदिने प्रतिगृहं ध्वजारोपणं क्रियते। स्वास्थ्यसंरक्षणाय च निम्बवृक्षस्य सपुष्पाणि नवकिसलयानि सिताखण्डैः मरीचिकादिभिश्च [कालीमिर्च] सह समास्वाद्यन्ते। एवन्तु सम्पूर्णेऽपि चैत्रमासे एतत्सेवनं पथ्यकरमिति जनाः केचन सेवन्ते अपि। ज्योतिर्विदां पञ्चाङ्गपूजनश्रवणपुरस्सरं सम्मानस्य, महाशान्तिपूर्वकं ब्रह्मणः सावयवस्य सम्वत्सरस्य पूजनस्य, आरोग्यव्रतस्य तिलकव्रतस्यापि विधानमत्र निर्दिष्टमस्ति धर्मशास्त्रग्रन्थेषु। एवं नानाविधानेनास्माभिः सोत्साहं समायोज्यते नववर्षोत्सवोऽयम्।

## संवत्सरशब्दनिर्वचनम् -

इदानीमत्र विचारणीयं यत् कदाप्रभृति सम्वत्सरस्यास्य प्रवर्तनं जातम्? इति विचारणायामेतत्तु निर्विचिकित्सितं यदस्मत्सम्वत्सरोऽयं सनातन अनाद्यनन्तश्च। यावच्चन्द्रदिवाकरौ सम्वत्सरस्यास्याक्षुण्णत्वमुपपद्यते। पूर्वमत्र शब्दस्यास्य निर्वचनं प्रस्तूयते।

सम् पूर्वकात् वस्-निवासे धातोः ''सम्पूर्वकाच्च'' (उणादि 3/22) सूत्रेण सर् प्रत्यये ''सः स्यार्धधातुके'' [7/4/49] इति सस्य तकारे '**सम्वत्सर**' शब्दो निष्पद्यते। ''**संवसन्तेऽस्मिन् भूतानीति सम्वत्सरः**''[1] यत्रेमानि सर्वाणि भूतानि सन्तिष्ठन्ते आश्रितानि च विनाशमु-पयान्ति। सम्वत्सरस्य पर्यायवाचकेषु अब्दशब्दस्यापि समावेशो वर्तते[2] यः खलु आप्लृव्याप्तौ स्वादिगणीय-धातोः ''अब्दादयश्च'' [उणादि 4/98] इति सूत्रेण ''दन्'' प्रत्यये ह्रस्वत्वे च निष्पद्यते। एतेनाप्यस्य संवत्सरस्य व्यापकत्वमुपपन्नं भवतीति निर्विवादम्।

## संवत्सरप्रवर्तनकालस्तत्स्वरूपञ्च-

इदानीं प्रवर्तनमस्य कदाऽभूदिति प्रसङ्गे स्मृतिपथं सहसा अधिरोहति ऋग्वेदीयोऽयं मन्त्रो यः खलु प्रतिदिनमस्माभिः सन्ध्योपासनायामघमर्षणमन्त्रत्वेन स्मर्यत एव -

**''ऋतं च सत्यं चाभीधात्तपसोऽध्यजायत। ततो रात्र्यजायत ततः समुद्रो अर्णवः। समुद्रादर्णवादधिसंवत्सरो अजायत। अहोरात्राणि विदधद् विश्वस्य मिषतो वशी। सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवीं चान्तरिक्षमथो स्वः'' [ ऋग्वेदः 10/90/1-3 ]**

मन्त्रेणानेन सुस्पष्टं जायते यत् विधात्रा सृष्टेः प्रादुर्भावसमकालमेव सावयवस्य संवत्सरस्यापि संरचना कृतेति। एवं नास्त्यस्माकं संवत्सरस्य द्वि-त्रिसहस्रपूर्विका अवधारणा, सा तु सनातनीति वक्तुं शक्यते।

1. निरुक्तम्-अध्याय-4, -4, 27

2. ''सम्वत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः'' अमरकोषः, कालवर्गः-20

कोऽयं संवत्सर इति जिज्ञासायां ज्ञायते "**सर्वर्तु-परिवर्त्तस्तु स्मृतः सम्वत्सरो बुधैः**"[3] इति। षडर्तूनामेकं परिक्रमणं सम्वत्सरस्वरूपं नियमयति। अत्र वसन्तादारभ्य शिशिरान्तमेकः परिवर्त्तः पूर्णतामेति। अयं ऋतुविभागश्च सूर्यमन्वेति। कालस्याधिदेवता सूर्य एवास्ति अयं कालविभागस्तदनुसारी एव। ऋग्वेदीयोऽयं मन्त्र एतत्स्पष्टयति-

**सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा।**
**त्रिनाभिचक्रमजरमनर्वं यत्रेमा विश्वा भुवनाऽधितस्थुः।।**

[ऋग्वेदः 2-3-14]

भावोऽत्र स्पष्टीभवति यत् सप्तरश्मिभ्यो रसं गृह्णन् अथवा सप्तर्षिभिः स्तुतोऽयं सूर्यो विचरति। त्रिनाभिः [ग्रीष्म-वर्षा-हेमन्त इति] ऋतुत्रयात्मकोऽयमजरः सम्वत्सरोऽस्ति यत्र सर्वे लोकाः स्थिताः सन्ति। मन्त्रस्यास्योत्तरार्द्धः सम्वत्सरपर इति निरुक्तकारः स्पष्टयति।[4] अत्र मन्त्रे ऋतु प्रकृतिप्राधान्यमाश्रित्य त्रिनाभि पदेन ऋतुत्रयस्योल्लेखः। पूर्वञ्चैकस्मिन् मन्त्रे ऋतूनां पञ्चसंख्यात्वं प्रतिपादितं तत्र हेमन्तशिशिरयोरभेदत्वेन।[5] परमितः प्राक् -

"**अथेमे अन्य उपरे विचक्षणं सप्त चक्रे षलर् आहुरर्पितम्**" "[ऋग्वेद 1/164/12]। अत्र निर्वचन-मुपलभ्यते निरुक्ते" इति षलृतुतया। अराः प्रत्यृता नाभौ। षट् पुनः सहते:" इति तत्रैव। ऋतुषट्कमपि निर्दिष्टम्।

**यजुर्वेदे** तु पुनः मासद्वयस्य नामोल्लेखपूर्वकमेकैकशः षडर्तूनां विभागः प्रदर्शितः, यथा- "**मधुश्च माधवश्च वासन्तिकावृतू**" [यजुर्वेदः 13/25] "**शुक्रश्च शुचिश्च ग्रैष्मावृतू**" [तत्रैव 14/16] **नभश्च नभस्यश्च वार्षिकावृतू** [14/15] "**इषश्चोर्जश्च शारदावृतू**" [14/16] "**सहश्च सहस्यश्च हैमन्तिकावृतू**" [14/27] "**तपश्च तपस्यश्च शैशिरावृतू**" [यजु. 15/57] इति। अमरकोशकारेणापि "**द्वौ द्वौ मार्गादिमासौ स्यादृतुः**" [कालवर्ग-13] एवं प्रत्यपादि। एवमेव मासानां दिनानाञ्च रूपकालङ्कारमाध्यमेन ऋग्वेदे सम्वत्सरो बहुधा स्तुतः-

**द्वादशारं न हि तज्जराय वर्षर्ति चक्रं परिद्यामृतस्य।**
**आ पुत्रा अग्ने मिथुनासो अत्र सप्तशतानि विंशतिश्च तस्थुः।।**

[ऋग्वेद-1/164/11]

तथा च-

**द्वादशप्रधयश्चक्रमेकं त्रीणि**
**नभ्यानि क उतच्चिकेत।**
**तस्मिन् त्साकं त्रिंशता न**
**शङ्कवोऽर्पिताः षष्टिर्न चलाचलासः।।**

[ऋग्वेद1/164/48]

अत्र मन्त्रयोर्द्वादशमासानां त्रिंशता षष्टिः [360] इत्यहोरात्राणां, सप्तशतानि विंशतिश्च [720] इत्यहोरात्रविभागे 360 दिनानां 360 रात्रीणाञ्च विभागं कृत्वा एतन्निर्दिष्टं यदस्मिन् सम्वत्सरचक्रे मासरूपाः प्रधयो भवन्ति। तथा चास्मिन् चक्रे 360 अहोरात्ररूपाः शङ्कवो भवन्ति। एवं सम्वत्सरस्य समग्रं स्वरूपमत्र ऋग्वेदे प्रदर्शितमेतेनास्य सनातनत्वमजरत्वमपि परिपुष्टं भवति।

3. अमरकोशः कालवर्गे 20 पद्यस्य क्षीरस्वामिकृतायां व्याख्यायां भागुरिवचनम्।
4. "संवत्सरप्रधान उत्तरोऽर्धर्चः नादित्यप्रधानः" संवत्सरः संवसन्तेऽस्मिन् भूतानि। ग्रीष्मो ग्रस्यन्तेऽस्मिन् रसाः। वर्षत्यासु पर्जन्यः। हेमन्तो हिमवान्। हिमं पुनर्हन्तेर्वा हिनोतेर्वा। अजरमजरधर्माणं अनर्वमप्रत्यृतमन्यस्मिन्। [निरुक्तम् 4/4/27]
5. "पञ्चारे चक्रे परिवर्तमाने तस्मिन्नातस्थुर्भुवनानि विश्वा। तस्य नाश्नस्तप्यते भूरिभारः सनादेवन शीर्यते सनाभिः" [ऋग्वेद 1.164.13] पञ्चर्तवः संवत्सरस्य इति च ब्राह्मण्। हेमन्तशिशिरयोः समासेन [निरुक्तम् 4.4.27]

**संवत्सरारम्भे चैत्रमासस्य वैशिष्ट्यम्** -

एतत्तु स्पष्टमेव यत् सावन-चान्द्र-सौर विभागतया संवत्सरस्य क्रमशः 360, 354, 365 अहोरात्रा गण्यन्ते।

**किमर्थं** संवत्सरस्य प्रवर्तनं चैत्रमास एवाभिमत-मत्रापि हेतुरवगम्यते यत् सायन निरयनोभयपक्षतः द्वादशराशिचक्रस्य प्रथममेषराशौ प्रायः चैत्रमास एव सूर्यस्य स्थितिर्भवति। अपरञ्च ऋतुविज्ञानाधारेण उष्णत्वशीतत्वप्रकृतितया ऋतवो विभागद्वये विभाज्यन्ते तत्तु वसन्त-ग्रीष्मवर्षाः उष्णर्तवः शरद् हेमन्त शिशिराश्च शीतर्तवः। उष्णर्तुषु वसन्तु रेव प्रथमर्स्तस्याविप प्रथमो मास श्चैत्र एव। अस्मिन्नेव मासे उभयप्रकृतिकयोरनयोः ऋतोः सङ्गमो भवति। ''अग्निसेमात्म जगदिति'' श्रुतिसिद्धान्तानुरूपमत्रैवाग्नौ सोमस्याहुतिर्जायते। एतेनापि एष एव कालः सम्वत्सरारम्भस्य सर्वथा सङ्गत इति। उष्णत्वं हि जीवनलक्षणम् अतएवास्मिन् काले वृक्षवनस्पत्यादयो नवपल्लवपल्लविताः भवन्ति। प्रकृतिः सर्वतः नवीनैवाभाति। प्रकृतेरिदं स्वरूपमेव नवजीव-नस्य प्रतीकम्। अतश्चैत्रमास एवं सम्वत्सरारम्भाय सर्वथा सङ्गतः प्रतिभाति। एष एव चोपयुक्तः सृष्टेरुद्भवकालः।

**तत्रापि शुक्लपक्षस्यौचित्यम्**-

ज्ञायत एवास्माभिर्यत् शुक्लपक्षे चन्द्रो वर्धमानकलो भवति। अस्यापि महत्त्वं वेदेषु प्रतिपादितमस्ति। यथा -

**पूर्वापरं चरतो माययैतौ शिशू क्रीडन्तौ परियातो अध्वरम्।**
**विश्वान्यन्यो भुवनाभिचष्ट ऋतूँरन्यो विदधज्जायते पुनः॥**

(ऋग्वेदः 10/85/18)

अपि च-

**नवो नवो भवति जायमानोऽह्नाँ केतुरुपसामेत्यग्रम्।**
**भागं देवेभ्यो विदधात्यायन् प्रचन्द्रमास्तिरते दीर्घमायुः॥**

(ऋग्वेदः 10/85/19)

कियान् मनोहरो रूपकालङ्कारस्य सन्निवेशोऽत्र मन्त्रे। एतौ शिशू-सूर्यचन्द्रमसौ क्रीडन्तौ परियातस्तत्र अन्यश्चन्द्रः ऋतून् विदधत् पुनः पक्षे वृद्धिं प्राप्नोति। अपि च शुक्लपक्षे प्रत्यहं शुक्लमेकैककलया वृद्धिं गन्छन् नवो नवोभवति चन्द्रोऽयम्। अयं दीर्घमायुः प्राणिभ्यः प्रयच्छति। **चन्दि** आह्लादने धातोनिष्पन्नत्वात् ''यथा प्रह्लादनाच्चन्द्रः'' इति च कालिदासीयवाक्यप्रकाशे सर्वाह्लादकरश्चन्द्रः औषधीशस्तु[6] अस्त्येवातएव आयुवर्धनत्वमत्रोचितमेवास्य। अनेन शुक्लपक्षस्यौ-चित्यमत्र प्रतिपद्यते। चान्द्रमासीयपरम्परानुसारन्तु मासस्यारम्भः शुक्लपक्ष-प्रतिपदात एव भवति। एतत्सर्वं तथ्यं विशदयति पुराणवचनमेतत्-

**चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि।**
**शुक्लपक्षे समग्रं तु तदा सूर्योदये सति।। इति।।**

[ब्रह्माण्डपुराणम् 1/28/35]

अपि च कालगणनाविज्ञानशास्त्रं हि ज्यौतिषं शास्त्रं तत्र स्वोदयलग्नस्पष्टसाधने ज्योतिर्विदः लङ्कोदयमान-मेवाश्रयन्ति। तत्रापि स्पष्टतया एतत्सर्वं साधितं **भास्करा-चार्येण** -

**लङ्कानगर्यामुदयाच्च भानोस्तस्यैव वारे प्रथमं बभूव।**
**मधोः सिताद्ये दिनमासवर्षयुगादिकानां युगपत्प्रवृत्तिः।।**

[सिद्धान्तशिरोमणिः, ग्रहगणित-कालमानाध्याय-15]

तदेवं सुस्पष्टमेतदुपर्युक्तप्रमाणैर्यच्चैत्रशुक्लप्रति-पदायामेव ब्रह्मणः सृष्टेराविर्भावस्तदैव च सम्वत्सरसरम्भ इति सर्वथा विज्ञानसम्मतम्। तदाविर्भाववर्षसंख्यायाः- संख्यातुं दुष्करत्वादिदानीं विक्रमसम्वत्सरगणनैवा-स्माभिर्व्यवह्रियते। **विक्रमादित्यस्य राज्यारोहणदिन**-मप्येतदेव अत इदानीं गताब्दत्वेन तदेव गण्यते।

6. ''विधुः सुधांशुःशुभ्रांशुरौषधीशो निशापतिः'' (अमरकोषः दिग्वर्ग-14)

तन्मिषेणाप्यस्माभिः सनातनः सः संवत्सर एवाराध्यत इति। नैतावदेवापितु सावयवं सम्वत्सरमाधारीकृत्यैव समग्रा अपि भारतीयाः पर्वोत्सवा आयोज्यन्ते सम्मान्यन्ते च। अस्माकं सर्वविधानि साङ्कल्पिकानि नित्यनैमित्तिकादीनि कर्मानुष्ठानानि सावयवस्य सम्वत्सरस्य सङ्कल्पमाध्यमेन स्मरणपूर्वकमेव सम्पाद्यन्ते। नैतावदेवापित्वस्माभिर्दैनिके सन्ध्या-तर्पण विधानेऽपि-

**ब्रह्मादयः सुराः सर्वे ऋषयः शौनकादयः।**
**आगच्छन्तु महाभागा ब्रह्माण्डोदरवर्तिनः।।**

इति ब्रह्मादीनामावाहनपूर्वकं क्रियमाणे देवर्षितर्पणे **''ब्रह्मा तृप्यताम्, विष्णुस्तृप्यताम्, रुद्रस्तृप्यतामित्यादिक्रमे सम्वत्सरः सावयवस्तृप्यताम्''** इति सावयवसम्वत्सरोऽपि तर्प्यते। एतदस्माकं सम्वत्सराराधनम्। एतत्सर्वं तन्महत्त्वमन्वाख्याति।

**नवरात्रोपासना** -

विदितमेवास्माकं यत्समग्रेऽपि वर्षे चतुर्णां नवरात्राणां माध्यमेनास्माभिः शक्तिः समाराध्यते। यतोहि शक्तिं विना कस्यापि वस्तुनः प्राणिनो वाऽस्तित्वकल्पना खपुष्पायितैव प्रतिभाति। शक्तिरेव वस्तुमात्रं स्थिरयति। शक्तेरेव तन्महत्त्वं यज्जगत्स्रष्टा स्वयं ब्रह्मा अपि तत्स्तवने स्वात्मनोऽसामर्थ्यं प्रकटयति।[7] तदाराधनमप्यस्मादेव चैत्रशुक्लप्रतिपद्दिनात् प्रारभ्य नवमीपर्यन्तं विधीयते। सम्वत्सरस्य नूतनस्येदं प्रथमं नवरात्रं यत्खलु वासन्तिकनवरात्रत्वेन शब्द्यते। अपरञ्चाश्विनशुक्लप्रतिपदातो नवमीपर्यन्तं शारदीयनवरात्रम्। मुख्यत्वेन नवरात्रद्वयमिदं कल्पितं सत्समाराध्यते। एतदतिरिक्तमाषाढमासस्य शुक्लप्रतिपदातो नवमीपर्यन्तं माघशुक्लप्रतिपदातोनवमीपर्यन्तमञ्च गुप्तनवरात्रसंज्ञत्वेनानुष्ठानिकैस्तज्ज्ञैश्च नवरात्रद्वयमपि समुपास्यते। वासन्तिकशारदीयनवरात्रयोर्मुख्यत्वेऽपि वैज्ञानिकं रहस्यं यदेतयोरनुष्ठानं मेषविषुवे तुलाविषुवे च भवति। विषुवद्वयेऽपि दिनमानं रात्रिमानञ्च प्रायः समानं भवति।[8] अत अनयोः कालयोः सूर्यस्यावस्थितिरशीत्यधिकशतांशे [180] वृत्तार्द्ध भागबिन्दौ भवति। अनयोर्द्वयोर्नवरात्रयोरन्तराले विंशतिर्विंशतिर्नवरात्रसमूहो व्यत्येति। यतोहि समग्रेऽपि वत्सरे चत्वारिंशन्नवरात्राणि [40] कल्प्यन्ते, तदैव [40X9 = 360] षष्ट्यधिकत्रिशतं वत्सरदिनानां पूर्तिर्जायते। एतन्मध्ये चतुर्णां नवरात्राणामाराधनविधानं सम्वत्सराराधने दशमांशहवनात्मकप्रयोग इव प्रतीयते। प्रत्यक्षमेव यदस्माभिः प्रत्येकस्मिन् जपपाठात्मकानुष्ठाने तदन्ते दशमांशहवनात्मकं विधानं विना तत्कर्मणः साङ्गतासिद्धिर्नैव मन्यते अनुष्ठानस्य सम्पूर्त्यर्थमिदमावश्यकं तद्वदेव सम्वत्सराराधनसाङ्गतासिध्यर्थमेतत् 360 दिनात्मकस्यानुष्ठानस्य दशांशत्वेन चतुर्णां नवरात्राणामुपासनं [4 X 9 = 36] क्रियते। अन्यथापि चतुर्णामेतेषामायोजनं मासत्रयान्तराले भवति, मासदिनानां (90) संख्यायाः दशमांशत्वं नवसंख्ययोपलभ्यत एव। पौषमासस्य मलमासतया तत्स्थाने माघमासो गृहीत चतुर्थनवरात्राय इति मन्ये तत्रापि नवरात्राणां चतुर्धात्वकल्पने अन्योऽपि हेतुस्तत्कालनिर्धारणे प्रामुख्यमावहति। विदितमेतत् यन्मनुष्याणां यस्त्रिंशद् दिनात्मको मासः सः पितॄणामेकोऽहोरात्रः, कृष्णपक्षे तद्दिनं शुक्लपक्षे च रात्रिर्मन्यते।[9] मनुष्याणां यो द्वादशमासात्मको वर्षः स देवतानामेकोऽहोरात्रः तत्रोत्तरायणं तद्दिनं दक्षिणायनञ्च रात्रिः।[10] अस्मिन्

7. यच्च किञ्चिद् क्वचिद्वस्तु सदसद्वाऽखिलात्मिके।
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे मया।।
[दुर्गासप्तशती 1/82]

8. ''समरात्रिन्दिवे काले विषुवद् विषुवं च तत्''
(अमरकोशः कालवर्ग-14)


9. ''मासेन स्यादहोरात्रः पैत्रः'' (अमरकोषः 1/4/21)

10. A.-''वर्षेण दैवतः'' (अमरकोषः 1/4/21)

10. B.- अमरकोशे सुधा व्याख्यायाम् (रामाश्रमीटीका)
[अमरकोश 1/4/21]

देवतानामहोरात्रमाने **देवानां सूर्योदयो मेषविषुवे** [चैत्रमासे] भवति। तन्मासे वासन्तिकनवरात्रोपासना जायते। **मध्याह्नश्च तेषां मिथुनान्ते कर्कादौ** [आषाढमासे] भवति, तत्र गुप्तनवरात्रोपासना, **सूर्यास्तश्च तेषां तुलाविषुवे** [अश्विनमासे] भवति, तत्र शारदीयनवरात्रोपासना, **निशीथश्च धनुरन्ते मकरादौ** [माघमासे] भवति तत्र **गुप्तनवरात्रोपासना** विधानं इति कृतमस्मन्महर्षिभिरिति स्पष्टीभवति।

अग्रे सन्दर्शितचक्रमाध्यमेनैतत्स्पष्टीकर्तुं किञ्चित् प्रयतितं मया अतस्तत्र सर्वमेतत्सांकेतिकरूपेण परीक्षणीयम्।




जैसा कि उपर्युक्त पंक्तियों में स्पष्ट किया गया है वैदिककालीन परम्परा से मेषादि बिन्दु (सौरमान) से सम्वत्सरारम्भ होता है, यह देवताओं का सूर्योदय काल एवं प्राय: वासन्तिक नवरात्रोपासना काल है। यहाँ से उत्तर गोलार्द्ध की ओर मेष वृष बिन्दु को क्रमश: चैत्र वैशाख एक एक माह में पार [राशि भोग] कर तृतीय मास ज्येष्ठ में मिथुनान्त को प्राप्त होता है। यहाँ से पुन: चतुर्थ माह आषाढ में कर्कादि बिन्दु से [देवताओं का मध्याह्न गुप्त नवरात्र] परावर्तित होकर तीन माह [आषाढ श्रावण भाद्रपद] में कन्यान्त तक पहुँचता है। यहाँ तुलादि बिन्दु से आश्विन मास [देवताओं का रात्र्यारम्भ, शारदीय नवरात्र] से दक्षिण गोलार्द्ध की ओर वृश्चिक व धनुरन्त तक (कार्तिक मार्गशीर्ष) पहुँचकर मकरादि [देवताओं का निशीथकाल गुप्त नवरात्र] से पुन: परावर्तित होकर तीन माह में [पौष माघ फाल्गुन] मीनान्त बिन्दु पर पहुँचता है यहीं संवत्सर की पूर्णता है। और इसी काल में वसन्त से शिशिरान्त षड् ऋतु चक्र का परिवर्तन पूर्ण होता है।

अन्यच्चापि शक्तिविचारे प्रथमा हि कालरूपा भगवत: शक्ति:।[11] द्वितीया च प्रकृतिरूपा।[12] तृतीया च महामायेति शक्तित्रयस्य निर्देश: प्राप्यते। एतास्तिस्र: शक्तय एवास्माभिर्नवरात्रोपासनायां क्रमश: त्रिष्वपि चरित्रेषु महाकाली-महालक्ष्मी-महासरस्वतीत्वेनोपास्यन्ते।

**नवरात्रमध्ये अहोरात्रसंख्याया नवत्वकल्पनायां हेतु:-**

भगवतो मायाशक्तिरियं त्रिगुणात्मिका भवति।[14] गुणाश्च सत्त्वरजस्तमोरूपा[15]स्त्रयस्तेषां त्रयाणामपि त्रिरावृतत्वादपि नवत्वमुपलभ्यन्ते।

तदेवम्-**शुद्धं सत्त्वम्, सत्त्वप्रधानंर ज:, सत्त्वप्रधानन्तम:। शुद्धं रज:, रज: प्रधानं सत्त्वम्, रज: प्रधानन्तम :।।**

एवमेव **शुद्धन्तम:, तम: प्रधानं सत्त्वम्, तम: प्रधानं रजश्चेति।** प्रकृतेरेतेषां गुणानामेतन्नवत्वमुपधार्यैवोपासनायामस्यां नवानामेवाहोरात्राणां परिकल्पनेयं वैज्ञानिकी प्रतिभाति महर्षीणामिति।

अन्योऽप्यत्र नवत्वविधाने हेतुरवगम्यते, तथाहि शक्तेर्गुणमयत्वात् गुणविभागतयासत्त्वप्रधाना सर्वशुक्ला सरस्वतीति महासरस्वती, रजोगुणप्रधाना महालक्ष्मी:, तम: प्रधाना महाकालीति संज्ञिता:। अस्य शक्तित्रयस्यापि पुनर्गुणत एव त्रयस्त्रयो भेदा: भवन्ति। एतेन एकाप्येषा

11. ''कालसंज्ञां तदा देवीं बिभ्रच्छक्तिरुरुक्रम:'' (भागवतम् 3/7/2)
12. ''प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया'' (गीता-46)
13. ''कात्यायनि महामाये महायोगिन्यधीश्वरि'' (भागवतम्-19/22/4)
14. ''दैवी ह्येषा गुणमयी मम माया दुरत्यया'' (गीता-7/14)
15. ''सत्त्वंरजस्तम इति गुणा: प्रकृतिसम्भवा:'' (गीता-14/5)

त्रिरूपा चिदचित्स्वरूपिणी महाशक्तिर्नवत्वं भजमाना बोभवीति।[16] अस्मादपि कारणादुपासनायां नवदिनानां (अहोरात्राणां) ग्रहणमौचित्यमावहति।

अन्योऽप्येको हेतुरत्रावगन्तुं शक्यते तद्धि विदितमेवास्माकं यन्नव-संख्यायाः पूर्णसंख्यात्वेनास्ति। किमपि वैशिष्ट्यम् कयापि संख्यया गुणितेयं स्वात्मानमेव (नवत्वमेव) प्रकटयतीति विशेषः। एतेनाप्युपासनाया-मस्यां नव अहोरात्राणां ग्रहणं सर्वथोचितं प्रतिभातीति। विस्तरवशादस्योदाहरणान्यत्र दातुं न शक्यन्ते। उह्यमेव तत्तु विद्वद्भिः पाठकैः।

**श्रीरामजन्मोत्सवः (रामनवमी)**

कियान् मधुरतमोऽयं संयोगो यन्नवसम्वत्सरारम्भदिने आयोज्यमानस्य वासन्तिकनवरात्रानुष्ठानस्य सम्पूर्ति-दिवसे नवम्यां तिथौ मर्यादापुरुषोत्तमस्य **''रामो विग्रहवान् धर्मः''** इति साक्षाद् धर्मस्वरूपस्य भगवतः श्रीरामस्याविर्भावदिनं **(रामनवमी)** यत् सश्रद्धं सोत्साहञ्चास्माभिः सम्मान्यते। **ऐषमस्तु** कोटिगुण-संवर्धितोऽयमस्मदानन्दोत्सव अयोध्यायाञ्चिरप्रतीक्षित-स्य श्री रामजन्मभूमिमन्दिरनिर्माणोपक्रमस्य शुभारम्भ-तयेति हर्षप्रकर्षविषयः। कीदृशोऽयं संयोगो यत् पुत्रकामनया यष्टुं महाराजस्य दशरथस्य मनो वसन्त एवाभवत्। यज्ञाय ऋष्यशृङ्गोऽपि वसन्त एव वृतः-

**ततः काले बहुतिथे कस्मिंश्चित् सुमनोहरे।**
**वसन्ते समनुप्राप्ते राज्ञो यष्टुं मनोऽभवत्।।**

(वाल्मीकीयरामायणम् बालकाण्ड:-12/1)

**ततः प्रणम्य शिरसा तं विप्रं देववर्णिनम्।**
**यज्ञाय वरयामास सन्तानार्थं कुलस्य च।**

(वाल्मीकीयरामायणम् बालकाण्ड:-12/2)

एतदनन्तरं व्यतीते सम्वत्सरे पुनर्वसन्त एव यष्टुं महाराजस्य दशरथस्य यज्ञस्थलीं प्रति प्रस्थानम्-

**पुनः प्राप्ते वसन्ते तु पूर्णः सम्वत्सरोऽभवत्।**
**प्रसवार्थं गतो यष्टुं हयमेधेन वीर्यवान्।।**

(वाल्मीकीयरामायणम् बालकाण्ड:-13/1)

पुनश्च यज्ञे समाप्ते ऋतूनां षट्कं व्यतीतम्। ततश्चापि द्वादशे मासेऽस्यामेव चैत्रशुक्लनवम्यां भगवतः श्रीरामस्यावतरणं जातम्-

**ततो यज्ञे समाप्ते तु ऋतूनां षट् समत्ययुः।**
**ततश्च द्वादशे मासे चैत्रे नावमिके तिथौ।।**

(वाल्मीकीयरामायणम् बालकाण्ड:-18/8)

**नक्षत्रेऽदिति दैवत्ये स्वोच्चसंस्थेषु पञ्चसु।**
**ग्रहेषु कर्कटे लग्ने वाक्पताविन्दुना सह।।**

(वाल्मीकीयरामायणम् बालकाण्ड:-18/9)

**प्रोद्यमाने जगन्नाथं सर्वलोकनमस्कृतम्।**
**कौसल्याजनयद् रामं दिव्यलक्षणसंयुतम्।।**

(वाल्मीकीयरामायणम् बालकाण्ड:-18/10)

अद्भुतोऽयं संयोगो यत्पुत्रकामना राज्ञो वसन्त एवोपजायते महाराजस्य दशरथस्य। वसन्त एव ऋष्यशृङ्गो यज्ञार्थं वृतः। वसन्त एव हयमेधस्य यजनं प्रारब्धम्। वसन्त एव यज्ञसमाप्तिस्ततो वसन्त एव मर्यादापुरुषोत्तमस्याविर्भावः। **सर्वमेतन्मधुमयं जातं मधाविति।**

अन्यथापि विचार्यते चेत् वसन्तर्तुः सर्वथा निर्मलत्वेन मधुत्वमावहति। मर्यदायाञ्चापि तमोऽभावो दृश्यते। तत्रापि मधुमासे मधुमयस्य शुक्ले पक्षे प्रकाशपूर्णे भागे मध्याह्ने च श्रीरामस्याविर्भावः तन्मर्यादात्मत्वं सर्वथा ज्ञापयति। यथा मध्याह्ने पूर्णप्रकाशे किमपि वस्तु तिरोहितं न भवति तथैव मर्यादापुरुषोत्तमस्य पावने चरित्रे किमपि गोपनीयं नास्ति। करामलकवत्प्रत्यक्षं भगवतश्चरित्रं प्रकाशितं मर्यादितञ्चाभाति। तन्मर्यादापूर्णं चरितमेवा-स्मान् पदे पदे तत्तन्मर्यादां शिक्षयति, यां मर्यादा-मनुपालयन् मानवो न केवलं मानवत्वमपितु देवत्वमाप्तुं जीवने समर्थो भवतिुमर्हतीति।

सकललोकमङ्गलकामनया - श्रीरामः शरणं समस्तजगतां, रामं विना का गतिरिति श्रीराममेवाश्रयेह-मिति शम्।

**सहसम्पाकः**
**भारतीपत्रिकायाः ''श्रीनिलयनम्''**
**ए-277, महेशनगरं जयपुरम् 9887852472**

16. क. ''सर्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी''
(दुर्गासप्तशती प्राधानिकं रहस्यम्-4)
ख. ''त्रिगुणा तामसी देवी सात्त्विकी या त्रिधोदिता''
(दुर्गासप्तशती-वैकृतिकं रहस्यम्-1)

# अध्यात्मरामायणे धर्मप्रतिष्ठापकः श्रीरामः

❑ डॉ. स्नेहलता शर्मा

अध्यात्यरामायणमप्रतिमं दार्शनिकं काव्यमस्ति। रामकथासम्बद्धं काव्यमिदमाध्यात्मिकसमृद्धेरुच्च-संस्कृतेश्च प्रतीकमस्ति। समग्रस्य विश्वस्यादिग्रन्थेषु वेदेषु अतीन्द्रियैः ऋषिभिः यदध्यात्मज्ञानमनुभूयोपन्यस्तं, यस्य प्रवाहक्रमः ब्राह्मणारण्यकोपनिषत्सूत्रस्मृतिग्रन्थेषु प्रावहत्, आध्यात्मिकतायाः सा विशदधारा अध्यात्म-रामायणे श्रीरामस्य पावनचरितमाध्यमेन सर्वत्र प्रवाहितास्ति।

आध्यात्मिकधरातले स्थितमध्यात्मरामायणम् उदात्तकाव्यमस्ति यत्खल्वध्यात्मनीतिसदाचारजीवन-मूल्यादर्शमानदण्डज्ञानभक्तिकर्माद्वैतविशिष्टाद्वैतसमन्वितमस्ति। श्रीरामस्य ब्रह्मत्वमस्य अध्यात्मदर्शनस्याधारोऽस्ति अत्र सीतायाः (मायायाः) प्रकृत्या तादात्म्यं वर्णितमस्ति। अत्र परब्रह्मणः स्वरूपस्य सर्वातीतस्वरूपस्य सर्वकारणात्मकरूपस्य वर्णनं प्राप्यते। काव्येऽस्मिन् स्थाने-स्थाने मूल्यानां नीतेः सदाचारादीनां वर्णनं प्राप्यते। मानवस्य करणीयाकरणीयकर्मणां नियमाः निर्धार्यन्ते येन समाजव्यवस्था सम्यक् भवेत्। जनाः न भवेयुः उन्मार्गगामिनः। एतेषां नियमानां सिद्धान्तानां च व्यावहारिकी दृष्टिः अध्यात्मरामायणे प्राप्यते। पुरुषार्थ-चतुष्टये मानवजीवनस्य परमलक्ष्यं मोक्षोऽस्ति। मोक्षप्राप्तये धर्मादीनि त्रीणि साधनानि सन्ति। धर्मादीनां समुचितरीत्या पालनेन मोक्षप्राप्तिः सम्भवा।

भारतवर्षमध्यात्मप्रधानमस्ति। अत्रत्यानां निवासिनाम् आचारविचारपरम्परासु धर्मानुकूलभावना विद्यमानाऽसीत्। भारतीयजीवनस्य प्राणः ज्ञानमूलको धर्मो मन्यते। सूर्यस्य धर्मस्तापः, जलस्य धर्मः रसः, अग्नेर्धर्मः दाहकत्वम् तथैव जीवनस्य धर्म आत्मज्ञानं मन्यते, कथ्यते अपि- 'धर्मो विश्वस्य जगतः प्रतिष्ठा।'

धर्मः सम्पूर्णजगतः प्रतिष्ठास्ति धर्मात्मा च सर्वेषामाश्रयः। धर्माचरणेन पापाः नश्यन्ति, धर्मे सर्वं प्रतिष्ठितमस्ति अतएव धर्मज्ञाः मनीषिणः धर्मं सर्वोपरि मन्यन्ते।

वैदिकवाङ्मये जगतः धारणत्वस्य नाम धर्मोऽस्ति। योगाध्ययनदानतपःसत्यक्षमादया-अलोभादयः साध्य-पदार्थाः शास्त्रेषु धर्मरूपे वर्णिताः -

**इज्याध्ययनदानानि तपः सत्यं क्षमा दमः।**
**अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः।**[1]

धर्मेणैव मनुज आदरणीयः सम्माननीयश्च मन्यते। रघुवंशे कथितम्-

**'तस्य धर्मरतेरासीद् वृद्धत्वं जरसा विना'**[2]

'सर्वैः मनुजैः स्वधर्मः पालनीय' इति शुक्रनीतावपि कथितम्। अध्यात्मरामायणे धर्मस्य विशिष्टं स्थानमस्ति। श्रीरामः धर्मस्य साक्षादवतारो मतः। अध्यात्मरामायणस्य अयोध्याकाण्डे रामवनगमनवार्तां श्रुत्वा लक्ष्मणः क्रुद्धो भवति तथा च दशरथं कैकेयीं भरतञ्च हन्तुमुद्यतो भवति तदा रामः तस्मै आध्यात्मिकमुपदेशं प्रयच्छति-

त्वं यद् वदसि सत्यं मन्ये, परमिदं तस्य कालो नास्ति। एतद् राज्यं देहश्चादि यदवलोक्यते तत्सर्वं यदि सत्यं भवेत्तर्हि तव श्रमः सफलो भवेत्। एते भोगास्तु मेघविताने विद्युल्लेखेव चञ्चलाः सन्ति आयुश्चाग्नितप्त लोहस्थितवारिबिन्दुरिव क्षणिकमस्ति-

**भोगा मेघवितानस्थविद्युल्लेखेव चञ्चलाः।**
**आयुरप्यग्निसन्तप्तलोहस्थजलबिन्दुवत्।।**[3]

यथा सर्पगले स्थितोऽपि भेकः दंशानपेक्षते तथैव कालसर्पग्रस्ता जना अनित्यभोगानिच्छन्ति। श्रीरामः वदति-

**पितृमातृसुतभ्रातृदारबन्ध्वादिसंगमः।**
**प्रपायामिव जन्तूनां नद्यां काष्ठौघवच्चलः।।**[4]

---

1. महाभारतम्-वनपर्वणि - 2/75 2. रघुवंशम्-1/23
3 अध्यात्मरामायणम् 2/4/20, 4 अध्यात्मरामायणम् 2/4/23

अर्थात् मातृ-पितृ-पुत्र-स्त्री-भ्रातृ-बन्धु-बान्ध-वादीनां-संयोगः प्रपायामेकत्र जनानामिवास्ति। संसारोऽयं सर्वदा रोगादिसंकुलः स्वप्नगन्धर्वनगरमिव मिथ्यास्ति मूढजना एवैनं सत्यं मत्वानुसरन्ति ।।[5]

अध्यात्मरामायणस्य एकस्मिन्स्थले लिखितमस्ति-

**क्रोध एको महान् शत्रुस्तृष्णा वैतरणी नदी।**
**सन्तोषो नन्दनवनं शान्तिरेव हि कामधुक् ।।**
**तस्माच्छान्तिं भजस्वाद्य शत्रुरेवं भवेन्न ते।[6]**

अर्थात् मनसः संतापस्य मूलं क्रोध एवास्ति। क्रोध एव संसारबन्धनस्य धर्मक्षयस्य च कारणमस्ति। अत एव क्रोधस्त्याज्योऽस्ति। क्रोधो मनुष्यस्य महान् शत्रुरस्ति, तृष्णा वैतरणी नदी अस्ति। सन्तोषः नन्दनवनं शान्तिश्च कामधेनुरस्ति अत एव क्रोधं परित्यज्य शान्तिः धारणीया। अनेन प्रकारेण श्रीराम उपदिशति लक्ष्मणम्।

अध्यात्मरामायणे किष्किन्धाकाण्डस्य प्रसंगोऽस्ति। यदा रामेण बाणैः विद्धः बाली वदति रामं-मया तव किमपाकृतम्? किमर्थं भवता हतोऽहम्? राजनीतिज्ञा-नाभावेनैव भवानेवं निन्दनीयं कर्माकरोत्। मामेवं व्याधमिव हत्वा भवान् किं पुण्यं लप्स्यते? तदा एवं कथिते सति रामो धर्मयुक्तं वचनमवादीत्-

**धर्मस्य गोप्ता लोकेऽस्मिंश्चरामि सशरासनः।।**
**अधर्मकारिणं हत्वा सद्धर्मं पालयाम्यहम्।**
**दुहिता भगिनी भ्रातुर्भार्या चैव तथा स्नुषा।।**
**समा यो रमते तासामेकामपि विमूढधीः।**
**पातकी स तु विज्ञेयः स वध्यो राजभिः सदा।।[7]**

श्रीरामोऽवदत्-त्वं बलात् कनिष्ठभ्रातुः भार्यया रमसे या दुहित्र्या भगिन्या स्नुषयास्तुल्या। अत एवाहं धर्मज्ञस्त्वामहनम्। यतो हि महापुरुषाः सदैव स्वकर्मभिः आचरणैश्च लोकान् पवित्रयन्ति। उक्तञ्च-

**त्वं तु भ्रातुः कनिष्ठस्य भार्यायां रमसे बलात्।**
**अतो मया धर्मविदा हतोऽसि वनगोचर।।**

युद्धकाण्डे रामस्य बाणैः मूर्च्छितो भूत्वा रावणः भूमौ पतति। रावणं क्षतविक्षतं दृष्ट्वा रामः तस्मिन्न प्रहरति। स्वधर्मं पालयन् रावणं वदति च रामः -

**अनुजानामि गच्छ त्वमिदानीं बाणपीडितः।[8]**

युद्धकाले क्षतविक्षते रात्रौ धर्मानुसारं प्रहारो न क्रियते। अतएव रामः रावणं लंकां गत्वा विश्रामार्थं कथयति। अनेन प्रकारेण अध्यात्मरामायणस्य युद्ध-काण्डस्य द्वादशसर्गे विभीषणः रामं धर्मार्थयुक्तमुत्तरं वदति। विभीषणः वदति यत् सः रावणो दुष्टः, मिथ्यावादी क्रूरः, समस्तधर्मव्रतादिरहितश्चासीत्। तस्य परस्त्री-गामिनः संस्कारकरणेऽहमसमर्थोऽस्मि। तदा रामः विभीषणं यथोचितकर्तव्यं पालयितुं प्रेरयति-

**मरणान्तानि वैराणि निवृत्तं नः प्रयोजनम्।**
**क्रियतामस्य संस्कारो मयाप्येष यथा तव।।[9]**

वैराणि मरणान्तानि भवन्ति। अस्माकं प्रयोजनं सम्पन्नम्। अधुना त्वयं यथा तव भ्राताऽस्ति तथैव ममापि। अतः अस्य संस्कारं कुरु। अपरजनस्य व्यवहारः कीदृशोऽपि स्यात् अस्माभिः स्वधर्मो न विस्मरणीयः।

अध्यात्मरामायणस्य सप्तमे काण्डे लक्ष्मणस्य परित्यागप्रसङ्गे धर्मस्य महत्त्वं प्रतिपादितम्। यदा लक्ष्मणपरित्यागभयेन चिन्ताग्रस्तो भवति रामः तदा लक्ष्मणः स्वयं वदति भवान् सन्तापं मा करोतु-

**मत्कृते त्यज सन्तापं जहि मां रघुनन्दन।।**

धर्मस्य रक्षार्थं मृत्युरपि स्वीक्रियतेऽत्र। अनेन धर्मस्य महत्त्वं सिद्ध्यति। अत्र श्रीरामस्य व्यक्तित्वमाध्यमेन आदर्शः स्थापितः। मनुष्येण स्वधर्मः सदैव पालनीयः। यो जनः विकटपरिस्थितिष्वपि धर्मरक्षणरतो भवति सः परमपदं प्राप्नोति। धर्मे निष्फले त्रिलोकस्य नाशो भवति। एवम्प्रकारेण अध्यात्मरामायणे धर्मधुरन्धररामस्य चरित्रमस्माकं कृते सर्वदा आदर्शरूपेण प्रतिष्ठापितमस्ति। अत्र रामस्य सम्पूर्णचरित्रमेव पुरो निधाय तदनुवर्तनं शिक्ष्यते।

**साहित्यविभागः,**
**ज.रा. राजस्थानसंस्कृतविश्वविद्यालयः,**
**जयपुरम्।**

5 अध्यात्मरामायणम् 2/4/25, 6 अध्यात्मरामायणम् 2/4/37-38
7 अध्यात्मरामायणम् 4/2/59-61,
8 अध्यात्मरामायणम् 6/9/29 9 अध्यात्मरामायणम् 6/12/33

# राष्ट्रियशिक्षानीतौ ( 2020 ) संस्कृतम्

❑ डॉ. कुलदीपसिंहः

भारतशासनेन चतुस्त्रिंशद्वर्षेभ्यः परं नवा राष्ट्रीय-शिक्षानीतिः समुद्घोषिता। पुरा 1935 तमे वर्षे इंग्लिश-एजुकेशन एक्ट, 1901 तमे वर्षे रवीन्द्रनाथटैगोरमहोदय-स्य शान्तिनिकेतनम्, 1904 तमे वर्षे महात्मगान्धिः-फिनिक्स स्कूल प्रभृतयः नैके उपक्रमाः अभवन्। तत आरभ्य अद्यावधि बहूनि परिवर्तनान्यभवन्। शिक्षाक्षेत्रे सम्प्रति नवा शिक्षानीतिः 2020 इति समागता। अस्याः उद्देश्यं विद्यार्थिनां सर्वाङ्गीणविकासः अर्थात् देशस्य कृते योग्यनागरिकाणां निर्माणं कृत्वा राष्ट्राभ्युदयाय योगदान-मस्ति। अस्यां नीतौ प्रारम्भिकशिक्षातः उच्चशिक्षां यावत् गुणवत्तावर्धनाय बहूनि पविर्तनानि कृतानि। बालकेषु **व्यावहारिकतां** सम्पाद्य **कौशलाभिवर्द्धनमत्र** वैशिष्ट्यं बिभर्ति।

''राष्ट्रीयशिक्षानीतिः'' (2020) इति निर्मातुं भारतशासनेन **2017 तमे** वर्षे राष्ट्रियशिक्षानीति-समितेः संघटनं कृतम्। तत्र ''इसरो'' इति संस्थायाः भूतपूर्वाध्यक्षः के. **कस्तूरीरंगन**महोदयः अध्यक्षरूपेण दायित्वं निरवहत्। भारतं ज्ञानक्षेत्रे, कौशलक्षेत्रे, प्रौद्योगिकीक्षेत्रे, विज्ञानक्षेत्रे, आर्थिकक्षेत्रे व विश्वे अग्रेसरं भवेदिति आशयः अत्र प्रादर्शि। पाठ्यक्रमे नमनीयता, व्यावहारिकशिक्षा, बहुभाषावादप्रभृतयः काश्चन विशेषतास्सन्ति अस्याः नीतेः। उच्चप्राथमिकस्तरे माध्यमिकस्तरे च कृत्रिमबुद्धिमत्ता, रचनात्मकचिन्तनं, पर्यावरणशिक्षा, समग्रस्वास्थ्यमित्यादिषु विषयेषु अत्र अधिकावधानमस्ति। भारतस्य सांस्कृतिकैकतायै, इतिहासस्य समीक्षणाय, भरतीयतायाः पुनरुत्थापनाय, बालकानां नैतिकविकासाय च पाठ्यक्रमे संस्कृत-मवश्यमेव स्थापनीयम्।

उच्चशिक्षायां गुणवत्ताभिसूचकानां विश्वविद्यालयानां महाविद्यालयानाञ्च प्रतिष्ठापनं यत्र बहुविषयिणी शिक्षा सुनिश्चिता स्यात्। स्नातकपाठ्यक्रमे एकवर्षस्याभिवर्द्धनं नाम त्रयाणां वर्षाणां स्थाने चतुर्णां वर्षाणां विस्तारः महाविद्यालयीयेभ्यः शिक्षकेभ्यः प्रशिक्षणम्, UGC, AICTE, NAAC इत्यादीनां संस्थानां प्रतिष्ठापनम्, ''एम्.फिल्.'' इति पाठ्यक्रमस्य अनौचित्यात् समापनम् इत्यादीनि प्रावधानानि अत्र **विशिष्टानि** सन्ति। अस्यां शिक्षानीतौ अनुसन्धानाधारितायाः विशेषतया प्रोत्साहनं दृश्यते।

वर्तमानशिक्षाप्रणाल्याः पाठ्यक्रमे सैद्धान्तिकज्ञानस्य प्राधान्यं वर्तते। अनुभवात्मकाधिगमाय, आलोचनात्मक-चिन्तनाय चात्र नवशिक्षानीतौ अधिकावधानं दृश्यते। शिक्षायै निर्धारितस्य व्ययस्य 3.2 प्रतिशतस्य स्थाने 6 प्रतिशतं कर्तुं लक्ष्यं वर्तते। इदं आधुनिकविषयेषु अनुसन्धानाय बलं ददाति। प्राचीनभारतस्य ज्ञान-विज्ञानयोः आधुनिकभारते विनियोगाय संस्कृतमेव माध्यमरूपेण स्यादित्यपि स्पष्टीकृतम्

**राष्ट्रीयशिक्षानीतौ भारतीयभाषाः**

अस्यां शिक्षानीतौ भारतीयभाषाणां विकासाय परामृष्टम् अर्थात् शिक्षणमाध्यमभाषा मातृभाषा उत स्थानीयभाषा स्यात्। पाठ्यपुस्तकान्यपि मातृभाषयैवानू-दितानि स्युरिति। भारतीयभाषासु पाठ्यचर्यामनूद्य तया भाषया सम्भाषणाय प्रेरणीयः छात्रगणः। अत्र भाषाशिक्षणे

संवादविधिः अत्यन्तमुपकारको वर्तते। त्रिभाषासूत्र-स्यानुवर्तनं पूर्ववदेव स्यात्। अर्थात् तिसृषु भाषासु विकल्पचयनाय राज्यशासनं स्वतन्त्रं वर्तते। परं **तिसृषु भाषासु द्वे भाषे भारतीये स्यातामिति अनिवार्यं** कृतमत्र शिक्षानीतौ। माध्यमिकस्तरे छात्रः यदि भाषां परिवर्तयितुमिच्छति तर्हि सः परिवर्तयितुं शक्नोति। परमेकस्यां भारतीयभाषायां साहित्यिकदक्षतां सम्पादये-च्छात्रः। **पाठ्यपुस्तकान्यपि द्वयोः भाषयोः अनूद्य स्युः।** भाषाशिक्षणं पोषणीयम् इत्येतदर्थम् आधुनिकप्रविधिभिः कक्षाशिक्षणं भवेदित्यपि अत्र परामृष्टम्।

मातृभाषायां जायमानं शिक्षणं न केवलं बालकस्य सर्वाङ्गीणं विकासं करोत्यपितु सांस्कृतिक-परम्पराणा-मवगमनाय महदुपकरोति। अस्माकं परम्परा: विश्वस्मिन् समृद्धाः परिपुष्टाश्च सन्ति। भारतीयभाषाः विश्वे सर्वातिशायिन्यः सन्ति। एतासु निहितं साहित्यं मानवजातेः कल्याणाय। छात्रान् भारतीय-भाषाभिस्सह योजयितुं माध्यमिकस्तरे आयोज्यमाने **''द लैंग्वेजेज ऑफ इण्डिया''** इत्यस्मिन् कार्यक्रमे भाषाणां ध्वनिविज्ञानेन, व्याकरणेन, शब्दकोशेन च परिचितान् कृत्वा तेभ्यः शास्त्रीयज्ञानाय प्रेरणा प्रदातव्या। अनेन कार्यक्रमेण भाषायाः सांस्कृतिकविविधताभिः परिचिताः सन्तः छात्राः परस्परं सौहार्दभावं प्राप्नुवन्ति।

## राष्ट्रीयशिक्षानीतौ संस्कृतम् ( 2020 )

विश्वस्मिन् विश्वे संस्कृतभाषा सर्वातिशायिनी, समृद्धा, विपुलसाहित्यस्य च निधिर्वर्तते। लैटिन-ग्रीक साहित्ययोः तुलनायां संस्कृतसाहित्यं महत्तमं वर्तते। समृद्धस्य आत्मनिर्भरस्य जगद्गुरोः भारतस्य निर्माणाय एषा शिक्षानीतिः अस्ति। अधीतसंस्कृतः कश्चन न केवलं गणिते, दर्शने, व्याकरणे, विधिक्षेत्रे, चिकित्साक्षेत्रे अपितु सर्वेषु क्षेत्रेषु शास्त्रीयज्ञानं प्राप्तुं शक्नोति। जीवनस्य उच्चतमैः आदर्शैः युक्तो भूत्वा भव्यं जीवनं यथा सम्पादयितुं पारयेत् तथा अत्र व्यवस्थोपकल्पिता। भाषामाधृत्य इतिहासः, संस्कृतिः, चिन्तनम्, जीवन-पद्धतिश्च जीवन्ति, समाजस्य विस्तारानुगुणं भाषायाम् अपि विस्तारः भवति। भारतीयसमाजस्य वाहिका संस्कृतभाषैव आसीत्, अतः अस्यै भाषायै अत्र नवशिक्षानीतौ महान् आदरः प्रकटितः।

संस्कृतपाठ्यपुस्तकानां लेखनं सरलमानकसंस्कृतेन (Simple Standard Sanskrit) स्यात्, येन आनन्ददायकरूपेण संस्कृतमाध्यमेन संस्कृतशिक्षणं (Sanskrit through Sanskrit) सम्भवेत्। प्रत्येकं छात्रः सरलमानकसंस्कृतेन प्रवीणो भूत्वा संस्कृतेन उत्तरं लिखितुं प्रयतेत।

## संस्कृतमाध्यमेन संस्कृतशिक्षणे समस्याः।

भाषायाः जीवनं व्यवहारे एव निर्भरम्। जगति विद्यमानासु भाषासु ताः एव जीवन्ति यासु व्यवहारः क्रियते। भाषायामेव तद्देशीया संस्कृतिः सभ्यता च तिष्ठतः। भारतीयसंस्कृतिश्च संस्कृताश्रिता। अतः प्राचीनकाले गुरुकुलेषु आश्रमेषु च संस्कृतमाध्यमेन शास्त्राणि पाठ्यन्ते स्म। अनया एव भाषया व्यवहारोऽपि जायते स्म। परं कालस्य प्रभावात् इयं व्यवहारबाहुल्यात् विरता दृश्यते। संस्कृतशिक्षणव्यवस्थायाः क्षरणमपि अभवत्। अनेन भारतीयसंस्कृतेरपि क्षरणं जातम्। अस्माकं भारते यो ज्ञानराशिः अस्ति यच्च गौरवं वर्तते, तस्य हेतुः संस्कृतमेव। परं शिक्षणे संस्कृतमाध्यमस्य उपेक्षया एतस्य वाङ्मयस्यापि अनुदिनं ह्रासः जायमानो वर्तते। ज्ञान-विज्ञानक्षेत्रे बहु किमपि आविष्कृत्य विश्वस्मै विश्वाय दत्तम् इति पुष्ट्यर्थं संस्कृतमेव शरणम्। येषां प्राचीनविश्वविद्यालयानां नवशिक्षानीतौ समुल्लेखः कृतः तेषु नालन्दा-तक्षशिक्षा विश्वविद्यालयौ प्रामुख्यं भजेते।

तत्र वेदाः, योगः, वेदाङ्गानि, तन्त्रविद्या-प्रभृतयः बहवो विषयाः अध्याप्यन्ते स्म तत्रापि शिक्षणस्य माध्यमरूपेण संस्कृतमेवासीत्।

अनेन प्रकारेण स्पष्टं जायते यत् भारतसन्दर्भे संस्कृतशिक्षणं नाम एकस्याः भाषायाः शिक्षणमात्रमिति नास्ति। संस्कृतशिक्षणेन भारतीयाः आत्मपरिचयं प्राप्नुवन्ति। प्राचीनकाले कण्ठस्थीकरणविधिः एव संस्कृतस्य विधिः आसीदिति केचन कथयन्ति परं नैतद् युक्तियुक्तम्। बहवो लोकाः कथयन्ति यत् संस्कृत-माध्यमेन शिक्षणेन किं प्रयोजनम्? किम्वा संस्कृत-सम्भाषणेन प्रयोजनमिति? अतः संस्कृतशिक्षकेन तत्र जागरूकतया भाव्यम्। यद्यपि संस्कृतभाषायाः शिक्षणे कतिचन समस्याः अपि दृश्यन्ते। तथापि जागरूकः संस्कृतशिक्षकः समस्यानां समाधानं कर्तुं प्रयतेत।

**संस्कृतशिक्षणसमस्याः**

भाषायाः औपचारिकशिक्षणन्तु कक्षासु एव भवति। कक्षासु शिक्षकः शिक्षणविधिः, पाठ्यक्रमः, छात्रः, शिक्षणोपकरणानि, निर्देशमाध्यमः इत्यादि कारकाणि भवन्ति। एतानि कारकाणि आश्रित्य संस्कृतशिक्षण-समस्यानां वर्गीकरणं द्विधा भवितुमर्हति-

1. संस्कृतकक्षाभ्यन्तस्समस्याः।
2. संस्कृतशिक्षायाः बहिर्भूतसमस्याः।

**संस्कृतकक्षाभ्यन्तस्समस्याः**

विश्वस्य या कापि भाषा भवतु, सर्वदा समाना स्थितिर्न भवति, कदाचित् तद्देशीयः सर्वोऽपि व्यवहारः तया भाषया क्रियते कदाचिच्च केवलं सा साहित्यस्य भाषा भूत्वा तिष्ठति। भाषायाः ज्ञानाय तस्यां परिष्काराय च प्रशिक्षणमपेक्षते। औपचारिकं प्रशिक्षणं प्रदातुं विद्यालयाः एव साधनभूतास्सन्ति। अतः कक्षाशिक्षणे अध्यापको यया भाषया निर्देशनं करोति सैव भाषा शिक्षणमाध्यम-भाषात्वेन परिगण्यते। संस्कृताध्यापकः संस्कृतेन अध्यापयति परं छात्राः नावगच्छन्ति इति कारणात् संस्कृतभाषां स मातृभाषया अध्यापयति। अतः सर्वतः प्राक् शिक्षकः तासां समस्यानां विषये जागरूकः स्यात् यासां समाधाने क्षमो भवति। अर्थात् यासां समस्यानां समाधानमात्मवशम् अस्ति ताः समस्या समादध्यात्। कक्षायां संस्कृतमाध्यमेन संस्कृतशिक्षणे काश्चन समस्यास्सन्ति तासां विवरणमित्थम्-

1. **मानकपाठयोजनाया अभावः** - योजनामनुसृत्यैव कार्याणि प्रवर्तन्ते। शिक्षणात्प्राक् काचिद् योजना निर्मेया भवति, यामनुसृत्य शिक्षकः कक्षायामध्यापयति परं संस्कृतशिक्षणाय शिक्षामनोविज्ञानस्य सिद्धान्तानाश्रित्य कापि निश्चितपाठयोजना नोपलभ्यते। केचन अध्यापकास्तु पाठयोजनां विनैव पाठयन्ति। अतः सर्वमान्या एका संस्कृतपाठयोजना अवश्यं निर्मेया भवति।

2. **सैद्धान्तिकं शिक्षणम्**- शिक्षणक्रियायाः पूर्वं शिक्षकस्य समस्तमपि ज्ञानं सैद्धान्तिकं भवति तस्य सैद्धान्तिकज्ञानस्योपयोगं छात्राः व्यवहारे कथं कुर्युः? इति ते न जानन्ति। अतः शिक्षकः पाठितस्य विषयस्य व्यावहारिकप्रयोगस्य अवसरान् कल्पयेत्, एतदर्थं पाठ्यसहगामिन्यः क्रियाः महदुपकुर्वन्ति।

3. **आधुनिकोपकरणानां प्रयोगे अनुत्साहः** - कालानुगुणं शिक्षणोपकरणानि परिवर्तितानि परम्परागत-पट्टानां स्थाने स्मार्टपट्टाः समागताः परम्परागतशिक्षणस्य स्थाने ई-शिक्षणं प्रवर्तते। अतः संस्कृतशिक्षणाय अपि आधुनिकशिक्षणसंसाधनानामुपयोगं कुर्यादध्यापकः।

4. **उपागमानामनुप्रयोगे निरुत्साहः** - शिक्षणोद्देश्या-नामनुगुणमुपागमाः निर्धार्यन्ते, अतः ग्रन्थनोपागमः

संरचनात्मकोपागमः, सम्प्रेषणात्मकोपागमः प्रभृतयः बहवः उपागमाः भाषाशिक्षणाय उपकारकास्सन्ति अतः उचितमुपागमं स्वीकृत्य संस्कृतशिक्षणं कुर्यात् अध्यापकः।

5. **संस्कृतभाषायां पाठ्यपुस्तकानामनुपलब्धिः** - संस्कृतभाषायाम् आधुनिकविषयाणां (गणित-विज्ञान-सामाजिक विज्ञान-भूगोल) पुस्तकानि अल्पीयांसि एव सन्ति अथवा न सन्ति। आधुनिकभाषामाध्यमविद्यालयेषु भाषेतरे सर्वे विषया माध्यमभाषया एव अध्याप्यन्ते, अतः बालकः प्रथमकक्षातः उच्चमाध्यमिककक्षापर्यन्तं तस्यां भाषायां नैपुण्यं सम्प्रेषणकौशलं चार्जयति। अतः ये पारम्परिकसंस्कृतविद्यालयास्सन्ति तेष्वपि सर्वेऽपि विषयाः संस्कृतेन अनूद्य अध्यापनीयाः, फलतः संस्कृत-भाषायां सम्भाषणस्य नैपुण्यं स्वयमेव आगमिष्यति। उच्चस्तरे च बालकः स्वयमेव संस्कृतसाहित्यस्याध्ययनं विधास्यति।

6. **आन्तरिकाभिप्रेरणस्याभावः** - संस्कृताध्यापने शिक्षकः छात्रान् सकारात्मकेन प्रोत्साहनेन सभाजयेत्। तेन छात्राः संस्कृताध्ययने द्विगुणितेनोत्साहेन परिश्रमं करिष्यन्ति। उत्साह एव सफलतायाः प्रथमसोपानं वर्तते। अतः छात्रेभ्यः प्रोत्साहनमवश्यं देयम्।

7. **सततमूल्याङ्कनस्याभावः** - गुणवत्तायाः संवर्द्धनमेव शिक्षकस्य लक्ष्यं भवति यदि छात्रः वार्षिकपरीक्षासु उत्तमान् अंकान् अर्जयति तर्हि तस्योत्साहः अध्ययने वर्तते परं केवलम् एतावता एव गुणवत्ता संवर्धते चेत्, **तन्न**, यतोहि कक्षायां यत् अध्यापनं भवति तस्मिन् छात्राः परीक्षादृष्ट्या महत्त्वपूर्णान् अंशान् समृत्वा परीक्षासु कदाचित् श्रेष्ठान् अंकान् प्राप्नुवन्ति। परं यदि आवर्षं तस्य बालकस्य मूल्याङ्कनं क्रियते तर्हि वास्तविकी गुणवत्ता सम्प्राप्ता भवति। अतः सततसमग्रमूल्याङ्कनविधिभिः छात्राणाम् आवर्षं मूल्याङ्कनं करणीयम्।

**संस्कृतकक्षेतरसमस्याः समाधानानि च-**

संस्कृतं प्रति विश्वस्मिन् विश्वे समादरो वर्तते, परं केचन जनाः कर्मकाण्डस्य अथवा वर्गविशेषस्यैव इयं भाषा इत्युक्त्वा दुष्प्रचारं कुर्वन्ति। केचन अन्यथा ब्रुवन्ति यत् इयं भाषा अत्यन्तं कठिना, अत्यन्तं प्राचीना च वर्तते, इत्येवं भाषन्ते। अपरे केचन संस्कृतस्य अव्यवह्रिय-माणत्वात् इयं मृतभाषेति जल्पन्ति। अस्यै संस्कृतशिक्षायै धनव्ययस्यावश्यकता नास्ति इत्यपि केचन प्रतिपादयन्ति।

वस्तुतः इमे सर्वेऽपि विचाराः निर्मूलाः एव सन्ति तथापि संस्कृतशिक्षकः सरलसंस्कृत-सम्भाषणेन उपर्युक्तान् आक्षेपान् सहजतया एव अपाकर्तुं शक्नोति। संस्कृतभाषायां निहितस्य वैज्ञानिकज्ञानस्य विषये चर्चां कृत्वा संस्कृतस्य आधुनिकविज्ञानयुगे प्रासङ्गिकतां निरूपयितुं शक्नोति। "संस्कृते सर्वेषामधिकारः अस्ति" इति वचनेन सह शिक्षकः विविधधर्माणां संस्कृतेन साकं सम्बन्धस्य प्रतिपादनं कर्तुं शक्नोति। आधुनिक-प्रौद्योगिकीमाध्यमानां प्रयोगेण संस्कृतशिक्षां प्रयच्छेत्, इत्येवं प्रकारेण संस्कृतशिक्षकः संस्कृतक्षेत्रसमस्यानामपि समाधानं कर्तुमर्हति।

**सन्दर्भाः** -


1. मीमांसक युधिष्ठिर, संस्कृत पठन-पाठन की अनुभूत सरलतम विधि (द्वितीयभाग), रामलालकपूर ट्रस्ट, बहावलगढ़ हरियाणा।

2. चौबे, विजयनारायण, संस्कृतशिक्षणविधि, हिन्दीग्रन्थ प्रभाग, उत्तरप्रदेश हिन्दी संस्थान।

3. www.ugc.ac.in

4. www.hindustantimes.com

5. www.mhrd.gov.in



**सहायकाचार्यः (शिक्षाशास्त्रम्)**

**ज.रा.राजस्थान-संस्कृतविश्वविद्यालयः, जयपुरम्**

पुस्तकसमीक्षा

# शतकद्वयम्

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

## नीतिशतककाव्यम्

शतककाव्यानां परम्परा सुपरिचिताऽस्ति संस्कृत-साहित्ये। भर्तृहरेः शतकत्रयं विश्वविदितमेव। इमामेव परम्परामाधृत्य सुप्रथितेन विद्वद्वर्येण आशुकवि- पं. **रामस्वरूपदोतोलिया**वर्येण यन्नीतिशतकं व्यरचि तत् ''अभिनवनीतिशतकम्'' शीर्षकेण सपद्येव प्रकाशित-मस्ति। प्रमुखतः शार्दूलविक्रीडितच्छन्दसा प्रणीतानी-मानि पद्यानि 167 संख्याकानि विविधान् विषयान् स्पृशन्ति। प्रारम्भे देवस्तुतिपद्यानि, मङ्गलाचरणपद्यानि च संगृहीतानि, अन्ते मङ्गलाशासनं प्रार्थना च दृश्यते। शालिनी-द्रुतविलम्बितविद्युन्मालाप्रभृतीनि छन्दास्य-न्यान्यपि कविवर्येण निबद्धानि।

पद्येष्वेषु शुभाशंसनं, समाजहितम्, भ्रष्टाचारोच्छेदः, परिवारसौमनस्यं, नारीसमादरः, महाराणाप्रतापसदृशानां वीराणामनुसरणं, सत्पुत्रकर्तव्यम् इत्याद्या विविधा विषयाः स्पृष्टाः सन्ति। विद्युन्मालाछन्दसि निबद्धानि कतिपयपद्यान्यन्ते, तदिदं गृणन्ति ''**भ्रष्टाचारोच्छेदो भूयात्**''। एकस्मिन् पद्ये दन्तानां रक्षा प्रशंसिताऽस्ति, निम्बस्योपयोगः परामृष्टः। ग्रन्थस्य सम्पादनं विद्वत्त्रय्या कृतमस्ति किन्तु प्रारम्भे विदुषा डॉ. **सीताराम-दोतोलियावर्येण** कविपरिचयः, ग्रन्थस्य विषयवस्तु-परिचायनम्, शतकसमीक्षणं च स्वकीये सम्पादकीये सविस्तरं प्रस्तुतमस्ति। प्रतिपक्षं हिन्द्यामनुवादः, अन्वयेन, भावार्थेन, छन्दपरिचयेन, विशेषसमीक्षया च सह समुपलब्धोऽस्ति यः पाठकानां सौविध्यं विदध्यात्।

पं. रामस्वरूप दोतोलियावर्येण रचितानां ग्रन्थानां परिचयः, प्रस्तुतस्य ग्रन्थस्य भर्तृहरिकृतनीतिशतकस्य च तुलनात्मकमध्ययनम्, अन्ये च ज्ञातव्या विषया अपि सम्पादकस्य डॉ. सीताराम दोतोलियावर्यस्य सम्पादकीये द्रष्टुं शक्याः। सानुवादस्य नूतननीतिशतकस्यास्य स्वागतं पाठकैः सोत्साहं करिष्यते इत्याशंसाना वयं समर्पयामो वर्धापनानि कविवर्याय, सम्पादकेभ्यो, प्रकाशनसंस्थानाय च। प्रारम्भे राज्यपालमुख्यमन्त्रि, कलासंस्कृति-विभागमन्त्रि, चिकित्सामन्त्रि-शिक्षामन्त्रि प्रभृतीनामन्येषां च शुभकामना मुद्रिताः सन्ति या काव्यसंग्रहादिषु सामान्यतो न दृश्यन्ते।

**अभिनवनीतिशतकम् कविः पं. रामस्वरूप दोतोलिया, सम्पादक मण्डलम् डॉ. सीताराम दोतोलिया, डॉ. चन्द्रप्रकाश शर्मा, नरेन्द्रकुमार दोतोलिया, प्रकाशक, आयुर्वेद हिन्दी संस्कृत पुस्तकभण्डार, झालानियों का रास्ता, किशनपोल बाजार, जयपुर पृ.सं. 156, मू. 300/-**

## कोरोनाशतकम्

विगतो वत्सरः (सन् 2020) विश्वस्मिन्नपि विश्वे कोरोनाख्यमहामारीप्रसारस्याभिशापं समानीतवानिती-तिहासेऽभिलेखिष्यते। भारतेऽपि सेयं महामारी भीषणान् परिणामानानीतवती। साम्प्रतमप्यस्याः प्रतिरोधस्योपायाः, क्रियन्ते। संस्कृतभाषा वैदिकी उषा इव ''**पुराणी युवति**'' रस्तीत्यहं सर्वदा वच्मि। प्राचीनेयं भाषा किन्तु नवीनतमा अपि विषया अनया विचार्यन्ते इति सुविदितं विदुषाम्। अतः कोरोनाया अपि चर्चा संस्कृते बहुभिः प्रकारैरवातरत्। संस्कृतकविभिरस्या विषये काव्यरचना कृताऽस्तीति प्रमाणयन्ती ''कोरोनाकोपशतकम्'' शीर्षकवहा काव्य-रचनैका सपद्येव प्रकाशिताऽस्ति सागर (मध्यप्रदेश) तः।

शतकरचनायाः प्राचीनाऽस्ति परम्परा। भर्तृहरि-प्रभृतीनां शतकानि सुविदितानि। तामेवाऽनुसरन् ग्वालियर (मध्यप्रदेश)स्थेन कविना डॉ. **बालकृष्णशर्मणा** कोरोनामहामारीमाधृत्य शार्दूलविक्रीडितेषु शतं पद्यानि विरचितानि सव्याख्यं सानुवादं च प्रकाशितानि सागरतः। कथं बुहाननगरादयं व्याधिर्विश्वे प्रासरदिति वर्णयन् कविर्भारते कथं

जनजीवनमनेन प्रभावितं, के के उपाया अस्य निराकरणाय कृताः क्रियन्ते चेति वर्णयति। कीदृशीयं विभीषिका, कथं चिकित्सका दिवानिशमेतन्निवारणाय चिकित्सायै च तत्परा दृश्यन्ते इत्यादिविषयाः शतकेऽस्मिन् द्रष्टुं शक्याः। व्याधिरयं रुद्रस्य कोपः, दुर्वाससो वा शाप इत्यादि विमृशन् कविरेतस्य सर्वविधानि दृश्यानि वर्णयति। विषाणोरभिशापः, मृत्योः प्रसारः भयचिन्तादयः परिणामाः पद्येषु वर्णिताः प्रसादगुणं वहन्ति। प्रतिपद्यम् अन्वयः, संस्कृतव्याख्या, हिन्दी-अनुवादः, पद्यगतानां विशेषाणां स्पष्टीकरणाय ''काव्यसौन्दर्य'' नाम्ना टिप्पणी च सहैव मुद्रिताः।

प्रारम्भे विद्वत्प्रवरस्य आचार्य**राधावल्लभत्रिपाठिनः** संस्कृते पद्यबद्धमभिमतम् प्रो. **मनुलता** शर्मवर्याया हिन्द्यां मङ्गलाशंसनम् प्रो. आनन्दप्रकाशत्रिपाठिना हिन्द्यामभि-मतम्, डॉ. नौनिहाल गौतमलिखिता कविपरिचयात्मिका हिन्दी भूमिका, कवेश्च ''आत्मनिवेदन'' शीर्षकः पूर्वाभासो मुद्रितोऽस्ति। संस्कृतकाव्यजगति कोरोनाया अयं प्रवेशः, सुतरां विनोदयेत् सर्वविधान् पाठका-नित्याशासाना वर्धापयामः कविवर्यं डॉ. बालकृष्ण-शर्माणम्।

**कोरोनाकोपशतकम् कविः डॉ. बालकृष्ण-शर्मा, प्रकाशक-अमन प्रकाशन, डॉ. पन्नालाल-साहित्याचार्य मार्ग, कीर्तिस्तम्भ, सागर, म.प्र. पृ.सं. 130 मू. 180/-**

हार्दिक शुभकामनाओं सहित :-

निर्माता

**ए इन्फ्रास्ट्रक्चर लिमिटेड**

**एस्बेस्टोस सीमेन्ट पाइप्स**

सस्ता, मजबूत एवं टिकाऊ

सर्वोत्तम 'माजा' तकनीक द्वारा निर्मित पेयजल, कृषि, बोरवैल, सीवरेज एवं ड्रेनेज में उपयोगी तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ

एवं

निर्माता

**एस्बेस्टोस सीमेन्ट शीट्स**

**छत एक, लाभ अनेक**

उच्च गुणवत्ता की फाइबर सीमेन्ट की नालीदार चादरें

कारखाना : हमीरगढ़ - 311025, जिला भीलवाड़ा (राजस्थान) दूरभाषः 01482-286102-07
दिल्ली कार्यालय : ए-९ए, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाषः- 011-26961849/26965673
जयपुर कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, जयपुर-302001 फोनः 0141-4019691/2370566
ईमेल आईडी : jaipur@kanoria.org (Pipe Dn.), sharma.ashok@kanoria.org (Sheet Dn.)

**राष्ट्रीय विचारों के लिए पढ़ें**

(हिन्दी) साप्ताहिक **पाञ्चजन्य**

(English) Weekly **ORGANISER**

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



**You can subscribe Panchjanya/Organiser Weeklies online through our Websites: www.panchjanya.com, www.organiser.org**

वार्षिक ग्राहक शुल्क

भारत में ₹ 700/- पाञ्चजन्य • ₹ 800/- ORGANISER (साधारण डाक द्वारा)

विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

**प्रसार विभाग**

**भारत प्रकाशन (दिल्ली) लिमिटेड**

2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली- 110055
फोन : 011-47642000,01,02, ई-मेलः circ@bpdl.in

# पत्रकारिताक्षेत्रे डॉ. भीमराव-अम्बेडकरस्य योगदानम्

❑ गिरीश शास्त्री

भारतरत्नः डॉ. भीमराव अम्बेडकरः सामाजिक-दासतायाः विपरीतम् संघर्षम् कृत्वा भारतम् आत्मनिर्भर-विकासशीलदेशानां प्रतिस्पर्धायाम् अग्रेसराय महत् प्रयासम् अकरोत्। सः बहुआयामी-प्रतिभायाः धनिकः आसीत। सः गभीरचिंतकः, लेखकः, साहित्यकारः, दार्शनिकः, राजनीतिज्ञः, समाजसुधारकेण सह उच्चकोट्याः पत्रकारः अपि आसीत्।

भारतीयसंविधानस्य शिल्पकारः भारतरत्नः डॉ.अम्बेडकरः समाजे जातिभेदस्य अस्पृश्यतायाः च विरुद्धम् अनवरतम् संघर्षम् कृतवान्। डॉ. अम्बेडकरः आजीवनम् देशस्य दलितानाम्, वंचितानाम, शोषितानाम्, श्रमिकानाम, महिलानाम् च समाजे समानतायाः कृते, तेषाम् समाजिक अधिकारेभ्यः बहूनि प्रयत्नानि करोति स्म।

सः अछूतोद्धारक-कार्येषु समाजसुधार-कार्यक्रमेषु च नारीणाम् जीवनोद्धारे पत्रकारितया सार्थकान् प्रयोगान् कृतवान्। स्वजीवनकाले वंचितजनान् एवम् मूकजनान् वाणीप्रदानाय एकम् समाचारपत्रम् '**मूकनायक**' इत्यस्य आरम्भम् अकरोत्। अनेन प्रकारेण दलितान् जागरूकाय पाक्षिकपत्रम् 'बहिष्कृतभारतस्य' प्रकाशनम् प्रारम्भम् कृतवान्। मूकनायक, बहिष्कृतभारतम् अतिरिच्य डॉ. भीमराव अम्बेडकरेण 'जनता' प्रबुद्धभारतश्च समाचार-पत्रयोः माध्यमेन स्वकीयसततप्रयासेन च जनेषु आत्मविश्वासोत्पत्तिं अकरोत्। अनेन वंचितजनेषु नवजागृत्याः उद्भवम् अभवत्। तेन ते संघठिताः संजाताः।

1920 तमे मूकनायकसमाचारपत्रम् मराठी-भाषायाम् आरम्भम् कृतवान्। 29 वर्षीयो डॉ. अम्बेडकरः मूकनायकसमाचारपत्रस्य प्रथम-अंकस्य संपादकीये कथयति-समाजोद्धाराय सुविचारेषु संलग्नकरणाय समाचारपत्राणाम् आवश्यकता भवति।

सः दलितसमाजस्य एकम् शिक्षितयुवकम् पांडुरंग नंदरामभटकरमहोदयं संपादकरूपेण कारणवशात् नियुक्तवान्।

मूकनायकसमाचारपत्रस्य मुखपृष्ठे 'मराठी-भाषायाः' श्रेष्ठ-सन्त-तुकाराम-महाराजस्य अभंगस्य पंक्तिद्वयम् उद्धृतम् आसीत् -

**''काय करूं आता धरूनीयां भीड।**<br>
**निःशंक हे तोंड वाजविले।।**<br>
**नव्हे जगीं कोणी मुकीयांचा जीण।**<br>
**सार्थक लाजून नव्हे हित।।''**

(अर्थात् : अब संकोच करने का कोई मतलब नहीं। अब निःशंक होकर बात करूंगा। मूक होकर जीना ठीक नहीं। लाज संकोच से किसी का हित नहीं होगा।)

मूकनायकसमाचारपत्रे डॉ. अम्बेडकरः 14 लेखानाम् प्रकाशनम् कृतवान्। 31 जनवरी 1920 तमे प्रथमे अंके '**मनोगतः**', द्वितीयांके 14 फरवरी 1920 तमे प्रकाशिते '**स्वराज्याची सर सुराज्याला नाही**', 28 फरवरी 1920 तमे '**यह स्वराज्य नहीं, हम पर राज्य है**' आसीत्। अस्मिन् अंके प्रथमवारम् विज्ञापनस्य प्रकाशनम् अभवत्। सः विज्ञापनदाता तक्षकः आयुर्बीमायाः कार्मिकः आसीत्। चतुर्थ-अंके 27 मार्च 1920 तमे 'हितेच्छ' नाम्ना पाठकस्य पत्रम् अपि प्रकाशितम् कृतम्। अस्मिन् अंके एकम् विज्ञापनम् '**गोदरेज**' संस्थायाः आसीत्।

5 जून 1920 तमे अंके प्रकाशितम् अखिल भारतीय बहिष्कृतसमाजपरिषद्, नागपुरस्य अधिवेशनस्य विस्तृत-विवरणमासीत्। 31 जुलाई 1920 तमे समाचारपत्रस्य संपादकः 'ज्ञानदेव ध्रुवनाथ घोपल' भविष्यति- इति घोषणां कृत्वा अम्बेडकरः उच्च शिक्षायाः कृते विदेशम् अगच्छत्।

मूकनायकसमाचारपत्रम् 1920 तः 1923 पर्यन्तम् प्रकाशितम् अभवत्। डॉ. अम्बेडकरः 1924 वर्षे बहिष्कृतहितकारिणीसभायाः स्थापनां कृतवान्। अनया 'बहिष्कृत-भारत' नाम्नः समाचारपत्रस्य पाक्षिकं प्रकाशनम् प्रथमवारम् 03 अप्रैल 1927 तमे अभवत्।

बहिष्कृतभारतसमाचारपत्रस्य बहिष्कृत-भारत पत्रिकायाः प्रत्येकम् अंकम् उत्कृष्टतमं भवेत् एतस्य कृते अम्बेडकरः प्रयत्नशीलः आसीत्।

अस्मिन् समाचारपत्रे सामाजिकवर्णव्यवस्थायाः विषये लेखाः आसन्। निम्नवर्गोपरि उच्चवर्गाणां प्रतिदिनम् अमानवीयकृत्यानां घटनाः अभवन्, ताषाम् विश्लेषणम् करोति स्म। अस्मिन् पत्रे '**पुनश्च हरि ऊँ**' इति शीर्षकरूपेण संपादकीयं लिखितम् आसीत्।

अम्बेडकरः धन संग्रहणार्थं 'बहिष्कृत फंडं' स्थापितं कृतवान्। अम्बेडकरस्य इच्छा असीत् यत् 'बहिष्कृत फंड' द्वारा धनम् एकत्रितं कृत्वा एकः मुद्रणालयः स्थापितो भवेत्। परन्तु तत्र सकारात्मकपरिणामाः न जाताः।

डॉ. गंगाधर-पानतावणे लिखति यत् 'बहिष्कृत-भारतं हिंदूसमाजे आगता एकः वात्यावेगः आसीत्।' डॉ. अम्बेडकरस्य एकः सहयोगी एवं समतापत्रस्य संपादकः श्री दे.वि. नाईकः तत्कालीनसमये सवर्ण जनान् अम्बेडकरस्य लेखानां पठनाय आह्वानम् अकरोत्।

पश्चात् 24 नवम्बर 1930 तमे 'जनता' पत्रस्य देवराव विष्णुनाईकमहोदयस्य सम्पादकत्वे प्रकाशनम् अभवत्। डॉ. अम्बेडकरः एतस्य संपादकः तु नासीत् परन्तु अस्य प्रारम्भिकप्रकाशनकार्ये महोदयस्य महत्त्वपूर्णं योगदानम् आसीत्। दे. वि. नाईकः प्रगतिशीलविचाराणां एकः ब्राह्मणः आसीत् तथा अछूत-आंदोलने सक्रियरूपेण स्वभूमिकायाः निर्वहनम् अकरोत्। आरम्भे एतद् पत्रम् पाक्षिक-पत्रम् आसीत् परन्तु अनन्तरम् साप्ताहिकपत्ररूपे रूपान्तरितम् अभवत्। पत्रिकायाः मुखपृष्ठे शीर्षस्थाने मुद्रितम् भवति स्म यत् - 'डॉ. भीमराव अम्बेडकरः, एम. ए, पी.एच.डी., डी.एस.सी, बार एट लॉ. महोदयस्य नेतृत्वे प्रकाशितम् जनहितप्रवर्तकम् पाक्षिकपत्रम् '**जनता**'।

डॉ. अम्बेडकरः प्रथम गोलमेजपरिषदः श्रममंत्री, स्वतंत्र भारतस्य प्रथमन्यायमंत्री तथा संविधानकर्ता-रूपेण महत्त्वपूर्णदायित्त्वं-निरवहत् तस्य आंदोलनान् जनसामान्यपर्यन्तम् वाहकरूपे जनतासमाचारपत्रम् प्रापयतिस्म।

4 फरवरी 1956 तमे दिनांके जनतापत्रस्य नाम प्रबुद्धभारतनाम्ना प्रवर्तमानं अभूत्।

4 फरवरी 1956 समयादारभ्य 6 दिसम्बर 1956 समयपर्यन्तम् 'प्रबुद्धभारत' इत्याख्यस्य पत्रस्य नियमितं प्रकाशनं तेनैव अवलोकितम्।

'मूकनायक' इत्यतः आरभ्य 'प्रबुद्धभारत' पर्यन्तम् बाबासाहेबभीमरावस्य पत्रकारितायाः यत्किमपि यात्रा अस्ति, सावास्तविकरूपेण तस्य सामाजिकस्य, सांस्कृतिकस्य, राजनीतिकजीवनस्य च संघर्षमयी यात्रा विद्यते। आसु पत्रिकासु न केवलं दलित एव अपितु **सवर्ण जनाः** अपि लिखितवन्तः आसन्। पत्रकारिता समाजपरिवर्तनस्य सशक्तमाध्यम इति अम्बेडकस्य मतिः आसीत्।

**सन्दर्भग्रन्थसूची**

- सूर्यनारायण रणसुभे, पत्रकारिता के युग निर्माता - डॉ. भीमराव अम्बेडकर, प्रभात प्रकाशन, नईदिल्ली, 2010

- डॉ. गंगाधर पानतावणे, पत्रकार डॉ. बाबा साहब आंबेडकर - धनञ्जय कीर, डॉबा बाबा साहेब आंबेडकर

- खैरमोड़े, डॉ. बाबा साहब आंबेडकर चरित्र, खंड 2

- संपा. रत्नाकर गणवीर, विलायतेहूनडॉ. बाबा साहबांजी पत्रे, - डी. एस. शेषराघवाचारी, भारतरत्न - डॉ. भीमराव अम्बेडकर - गिरीशशास्त्री, युगनिर्माता-डॉ. भीमराव अम्बेडकर, (जीवन दर्शन), रेनबोऑफसेट प्रिन्टर्स, जयपुर, 2017

**शोधार्थी,**

**पत्रकारिता एवं जनसंचार-विभाग,**

**बाबासाहेब भीमराव अम्बेडकर विश्वविद्यालय, लखनऊ.**

**ई मेल-girishshastri1@gmail.com,**

**मो. - 9461858766**

नारी-स्तम्भः

# भयानां भयम्, भीषणं भीषणानाम्

❑ डॉ. राजेश्वरी भट्टः

भारतदेशे नारी सर्वशक्तिमत्या देव्या अंशावतारमिव सम्मान्यते। सेवा, शक्ति, दानादयो गुणा जन्मनैव तया सह जातानि ईश्वरप्रदत्तान्याभूषणानि सन्ति तस्याः। एवं दिव्य-गुणानाम् आश्रयेण दृढ़संकल्पेन च नारी दुष्करमपि सुकरं करोति। दृश्यते यद् दीर्घकालात् पितुः गृहे कनीनिकेव पालिता पोषिता कन्या अलौकिक-सामर्थ्येन एव विवाहानन्तरं क्षणेनैव केनापि अपरिचितयुवकेन तस्य परिवारेण च सह सर्वास्ववस्थासु समर्पितभावेन सन्तोषवृत्त्या च जीवनं यापयति। अस्मिन् क्रमे राजस्थानस्य लोकप्रिये ''राजस्थानपत्रिका'' नाम्ने समाचारपत्रे ''ये है आयरन लेडी'' इति शीर्षकेण प्रकाशितं ''श्रीमत्याः शारदायाः सशक्तं प्रेरणीयञ्च चरित्रम्'' इति। अत्रोल्लेखनीयं वर्तते, यया दारिद्र्यदोलायां दोलायमानं आत्मनः परिवारं स्थिरीकर्त्तुं यदाचरितं तद् दृष्ट्वा साक्षाद् भयमपि अविभेत्। मनस्विनी शारदादेवी डूंगरपुरे बिछीवाडाग्रामे कस्मिन्नपि दलितपरिवारे जनिमलभत। अभावग्रस्ते अशिक्षिते परिवारे वर्धितायाः शारदाया विवाह अल्पवयस्येव दलितपरिवारे जातेन गणपतनाम्ना युवकेन सह सम्पन्नोऽभवत्। कालेन शारदा पुत्रस्यैकस्य, पुत्री-द्वयस्य च जननी अभवत्। आदिवसं कार्यं कृत्वा यत्किञ्चित् प्राप्येत तेनैव दम्पत्योः जीवनशकटं संतोषेणाचलत्। किन्तु विधेः कोपेन शारदायाः दाम्पत्यजीवनस्य नववर्षाण्येवातीतानि यदा घोररोगेण ग्रस्तः शारदायाः पतिः गणपतः प्राणानत्यजत्। सम्प्रति परिवारस्य भरणपोषणयोः समस्तोऽपि भारः शारदायाः स्कन्धयोरापतितः। नित्यं प्रातरुत्थाय शारदा गृहे गृहे गत्वा कार्यमकरोत्। किन्तु नियमितकार्यस्य अभावे यदा कदा तु परिवारो भोजनं विना बुभुक्षित एव अशेत। अस्मिन्नतोन्नते जीवन एकदा बिछीवाड़ा-ग्रामस्य आरक्षीस्थानक-क्षेत्रे (थाना इति क्षेत्रे) केचन आरक्षिणः चिकित्सकेनैकेन सह कस्यचित् शवस्य परीक्षणाय (पोस्टमार्टम) मरणोपरान्तं विधीयमानायां शल्यक्रियायां सहायतायै कस्यापि हरिजनस्य अन्वेषणे हरिजनवसतौ गतागतिमकुर्वन्। जानन्त्येव भवन्तो यन्निर्जनस्थाने स्थितं शवं दृष्ट्वा सहसा दृढचित्तस्य मनुष्यस्यापि शरीरं कम्पते, मुखं शुष्यति, जिह्वा जडतां प्राप्नोति। केचिद् विरला एव अङ्गुलिगण्याः पुरुषाः सन्ति ये विवशता-वशादस्मिन् कर्मणि व्यापृताः सन्ति, नारीणां तु का कथा? किन्तु ''बुभुक्षितः किं न करोति पापम्'', उक्तिमिमां चरितार्थयन्ती अभावैः ग्रस्ता शारदा परिवारस्य संरक्षणाय हृदये पाषाणं निधाय बुभुक्षितानाम् अपत्यानां महाकष्टात् शवशल्यक्रियायाः कष्टं नगण्यं विचार्य सम्बद्धानां जनानां समक्षं समुपस्थिता जाता। शवशल्यक्रियायां सहायतायै सम्मुखमागतां स्त्रियं दृष्ट्वा चिकित्सकः सहैव आरक्षिणश्च भ्रान्ताः किं कर्तव्य-विमूढाश्च, परस्परं लालाटिकाश्च जाताः। किन्तु शवशल्य-क्रियायाः सम्पादने अन्यस्य कस्यापि विकल्प-स्याभावे ते शारदाया प्रस्तावेन सम्मता जाताः। शारदायाः कथनेन ज्ञायते यत् यदा सा शवशल्य-क्रियाकक्षे प्रविष्टा जाता तदा तया पाषाणशिलायां स्थितस्य पुरुषस्यैकस्य शवो दृष्टः। शवम् उभयतः आरक्षिणः चिकित्सकश्च स्थिता आसन्। चिकित्सकस्य आदेशेन निर्देशेन च कम्पमाना शारदा हृदि धैर्यं धृत्वा ईश्वरं स्मृत्वा शवे छुरिकया प्रहारं कृतवती। कार्यस्य समाप्त्यनन्तरं आरक्षिभिः तस्यै 500 रुप्यकाणि प्रदत्तानि। तस्मिन् विषमे काले शारदायै राशिरयं वरदानरूपः फलदायकश्चाभवत्। तद्दिनात् शवशल्य-क्रिया शारदायै जीविकाया साधनमभवत्। सहैव परिवारसंरक्षणस्यैष माध्यमो जातः। दशवर्षेभ्य अस्मिन्

**घोर कर्मणि संलग्ना शारदा अद्यप्रभृति 500 शवानां शल्यक्रियाकर्मणि सहभागिनी अभवत्। विषमेष्वपि विवेकसूत्रं धारयित्वा सशक्तरूपेण समाजे ग्रीवामुत्थाय स्थिता शारदा लोके नूनं प्रेरणीया वर्तते।**

## हिन्दी अनुवाद

भारतवर्ष में नारी महाशक्ति के अंशावतार के रूप में सम्मान्या है। सेवा, सामर्थ्य दान आदि गुण उसके व्यक्तित्व में जन्मजात ईश्वर प्रदत्त आभूषण हैं। इन दिव्यगुणों के आश्रय से एवं अपनी दृढ संकल्पशक्ति से नारी दुष्कर को भी सुकर कर लेती है। दीर्घकाल से पिता के घर आँखों की पुतली की तरह पली पोसी कन्या अपनी अलौकिक सामर्थ्य एवं शक्ति से ही विवाह के पश्चात् दूसरे ही क्षण किसी अपरिचित युवक एवं उसके सम्पूर्ण परिवार के साथ हर हाल में समर्पित भाव से सन्तुष्टि से जीवन व्यतीत करती है इसी क्रम में राजस्थान के लोकप्रिय समाचार पत्र **''राजस्थान पत्रिका में ये है आयरन लेडी''** इस शीर्षक से प्रकाशित 'श्रीमती शारदा' का सशक्त एवं प्रेरणीय चरित्र यहाँ उल्लेखनीय है जिसने दरिद्रता के झूले में अस्त व्यस्त अपने अस्थिर परिवार को स्थिरता प्रदान करने के लिए जो जो किया उसे जानकर तो साक्षात् मृत्यु भी भयभीत हो जाती है। मनस्विनी शारदा देवी का जन्म डूँगरपुर जिले के बिछीवाड़ा गाँव में किसी दलित परिवार में हुआ था। अनेक अभावों से ग्रस्त अशिक्षित परिवार में बढ़ती हुई शारदा का विवाह छोटी अवस्था में ही दलित परिवार के ही गणपत नामक युवक के साथ सम्पन्न हो गया। समय के साथ शारदा को एक पुत्र एवं दो पुत्रियों की माता होने का सौभाग्य प्राप्त हुआ। दिन भर कार्य करके जो कुछ प्राप्त होता था उससे ही गृहस्थी की गाडी सुख से चल रही थी। किन्तु विधाता के कोप से शारदा के वैवाहिक जीवन के नौ वर्ष ही व्यतीत हुए थे तभी शारदा के पति गणपत का निधन हो गया। अब परिवार के भरण-पोषण का समस्त भार शारदा के कंधों पर आ पड़ा। शारदा नित्य प्रति प्रातःकाल उठकर घर घरों जाकर काम करती थी। किन्तु नियमित कार्य के अभाव से कभी-कभी तो परिवार को भूखे ही सोना पड़ता था। इस उतार चढाव को झेलते हुए जीवन में एक दिन बिछीवाड़ा गाँव के थानाक्षेत्र में कुछ पुलिस वाले एक चिकित्सक के साथ आये जो किसी शव के 'पोस्ट मार्टम' में सहायता करने के लिए हरिजन बस्ती में हरिजन को खोज रहे थे। आप तो जानते ही हैं कि किसी निर्जन स्थान में स्थित शव को देखकर सहसा दृढ़ चित्त वाले पुरुष का भी शरीर काँपने लगता है, मुँह सूखने लगता है जीभ जड़ हो जाती है। कुछ विरले ही अँगुलीगणनीय पुरुष हैं जो किसी विवशता वश इस कार्य में संलग्न हैं, इस विषय में नारियों के प्रवेश का तो प्रश्न ही कहाँ? किन्तु **''भूखा क्या नहीं करता''** संस्कृत भाषा की इस उक्ति को प्रत्यक्ष करने वाली, अभावों से ग्रस्त शारदा हृदय पर पत्थर रखकर परिवार की रक्षा के लिए भूखी सन्तानों के महाकष्ट के सामने ''शवशल्य क्रिया'' (पोस्ट मार्टम) के कष्ट को नगण्य मानकर सम्बद्ध व्यक्तियों के सम्मुख उपस्थित हो गई। सामने खड़ी स्त्री को देखकर चिकित्सक एवं पुलिसकर्मी भ्रमित, किं कर्तव्य विमूढ परस्पर एक दूसरे की ओर प्रश्न वाचक मुद्रा में देखने लगे। किन्तु शव शल्यक्रिया के सम्पादन के लिए अन्य कोई विकल्प न होने से वे शारदा के प्रस्ताव से सहमत हो गए। शारदा के कथन से ज्ञात होता है कि जब वह शल्य क्रिया कक्ष में प्रविष्ट हुई तब उसने पत्थर की बैंच पर स्थित एक व्यक्ति का शव देखा, शव के दोनों ओर चिकित्सक तथा पुलिस वाले खड़े थे। काँपती हुई शारदा ने चिकित्सक के आदेश एवं निर्देश से हृदय में धैर्य धारणकर ईश्वर को स्मरण करते हुए शव पर छूरी से प्रहार किया। कार्य की समाप्ति पर पुलिसवालों ने उसे 500 रुपये प्रदान किये। उस संकट काल में यह राशि शारदा के लिए वरदान के समान फलदायिनी थी। उस दिन से ही 'शव शल्य क्रिया' शारदा के लिए जीविका का साधन साथ ही परिवार के संरक्षण का माध्यम बन गयी। इस भयंकर कार्य में शारदा अब तक 500 शवों का पोस्ट-मार्टम कर चुकी है। घोर विपत्ति के समय भी विवेक से सशक्त रूप से समाज में गर्दन उठाकर चलने वाली शारदा लोक में प्रेरणीया है।

आयुर्वेद-स्तम्भः

# कासश्वासानुपाचरेत्

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**हेमन्ते शिशिरे च जठराग्निरतिप्रवृद्धो भवति, स पक्ता मात्राद्रव्यगुरुक्षमो भवति। तत्काले यदि सः भोजनात्मकमिन्धनं न लभते तदा देहजं रसं हिनस्ति। अतएव जनः जठराग्नेस्तोषार्थं ऋतुचर्यापालनार्थञ्च निर्देशानुरूपं यदा गुर्वम्लस्निग्धानां गरिष्ठानाञ्च भोज्यपदार्थानां सेवनङ्करोति तदा शरीरे बलोत्पत्तिर्भवति, किन्तु तत्सहैव शरीरे श्लेष्मणोऽभिवृद्धिरपि भवति। यद्यपि बलोत्पत्तौ धात्वात्मकस्य श्लेष्मणस्सहायत्वं भवति किन्तु क्रमेऽस्मिन्समुत्पन्नस्य दोषात्मकस्य श्लेष्मणोऽपि निचयो भवत्येव। स निचितः श्लेष्मा वसन्ते सूर्यरश्मिभिरीरितः कायाग्निं बाधते रोगांश्च बहून्प्रकुरुते, विशेषेण तुश्लेष्मजान्रोगान्करोति। द्रवीभूतः स्वस्थानात्प्रचलितः यत्रकुत्रचिच्च संरुद्धः संसृष्टो वा वातेन, पित्तेन, द्वाभ्यां वा प्रकुपितेनानेन श्लेष्मणा वसन्ते प्राथमिकरूपेण ज्वरः श्वासाः कासाश्च जायन्ते।**

हेमन्त एवं शिशिर ऋतु में जठराग्नि अत्यधिक प्रवृद्ध होती है। वह अग्नि मात्रा में गुरु एवं द्रव्य में गुरु को सहन करने वाली होती है। उस समय में यदि वह अग्नि भोजन स्वरूप इन्धन को प्राप्त नहीं करती है तो देह में उत्पन्न होने वाले रस को नष्ट करती है। इसलिए व्यक्ति जठराग्नि को संतुष्ट करने के लिए और ऋतुचर्या का पालन करने के लिए निर्देशन के अनुरूप जब गुरु, अम्ल एवं स्निग्ध तथा गरिष्ठ भोज्य-पदार्थों का सेवन करता है तब शरीर में बल की उत्पत्ति होती है, किंतु उसके साथ ही शरीर में श्लेष्मा की भी अभिवृद्धि होती है। यद्यपि बल की उत्पत्ति में धातुस्वरूप श्लेष्मा भी सहायक होता है, किन्तु इस क्रम में उत्पन्न दोषस्वरूप श्लेष्मा का भी संचय होता ही है, वह संचित श्लेष्मा वसन्त ऋतु में सूर्य की किरणों से प्रेरित हुआ कायाग्नि को बाधित करता है और अनेक प्रकार के रोगों को करता है। विशेष रूप से तो श्लेष्मा से उत्पन्न होने वाले रोगों को वह द्रवीभूत और अपने स्थान से चला हुआ तथा जहाँ कहीं भी संरुद्ध हुआ या वात से एवं पित्तदोष से संसृष्ट हुआ अथवा दोनों से संसृष्ट हुआ वह श्लेष्मा रोगों को उत्पन्न करता हे, प्रकुपित इस श्लेष्मा से वसन्त में प्राथमिक रूप से ज्वर, श्वास और कास उत्पन्न होते हैं।

**ऋतुचर्यापालनक्रमे तं श्लेष्माणं वसन्ते चैत्रमासे वमनेन निर्हरेत्। वर्तमानकाले तु बहवश्चिकित्सकाः पञ्चकर्मसम्पादने प्रवीणाः सन्ति, अतएव स्वस्थावस्थायामेव वमनकर्म सम्पादनीयं वर्तते। यद्यपीस्वीयसंवत्सरस्य गणनानुसारं तु मार्चमासस्योत्तरे पक्ष एप्रिलमासस्य च प्रथमे पक्षे वमनकर्मैतत् सम्पादनीयमस्ति, तर्हि अपि मार्चमासस्य प्रथमे पक्ष एप्रिलमासस्य चोत्तरे पक्षेऽपि स्वस्थवृत्तानुसारिवमनकर्म सम्पाद्यते दक्षैश्चिकित्सकैः। एषा ऋत्वनुसारिणी व्यवस्था स्वस्थेभ्यः वर्तते। तेन हि तेषु ऋतुजन्या विकाराः न भवन्ति, विशेषेण तु श्लेष्मजा विकारास्तत्रापि च श्वासकासानामनुत्पत्तिस्तु वैशेषिकी।**

ऋतुचर्या के पालन के क्रम में वसन्त ऋतु के चैत्र मास में उस श्लेष्मा को वमन से निकाल देना चाहिए। वर्तमान काल में तो अनेक चिकित्सक पञ्चकर्म को करने में प्रवीण हैं, इसलिए स्वस्थावस्था में ही वमनकर्म किया जाना चाहिए। यद्यपि ईस्वीय संवत्सर की गणना के अनुसार तो मार्च मास के उत्तर पक्ष में और अप्रेल माह के प्रथम पक्ष में यह वमनकर्म सम्पादन करने योग्य होता है तो भी मार्च मास के प्रथम पक्ष में और अप्रैल मास के उत्तर पक्ष में भी स्वस्थवृत्त के अनुसार वमनकर्म दक्ष चिकित्सकों के द्वारा सम्पन्न किया जाता है। यह ऋतु के अनुसार की जाने वाली व्यवस्था स्वस्थ व्यक्तियों के लिए है, इसके कारण निश्चित रूप से उन में ऋतुजन्य विकार नहीं होते हैं, विशेष रूप से तो श्लेष्मा से उत्पन्न होने वाले विकार नहीं होते हैं और उन में भी विशेषरूप सेश्वास और कास रोगों की अनुत्पत्ति रहती है।

**रुग्णेषु तु रोगिरोगावस्थानुसारि वमनकर्म कस्मिंश्चिदपि काले सम्पादयन्ति पञ्चकर्मविशेषज्ञाः।**

**यतोहि वमनं तु सर्वोपक्रमेभ्यः श्लेष्मणि प्रधानतमं मन्यन्ते भिषजः, तद्ध्यादित एवामाशयमनुप्रविश्योरोगतं केवलं वैकारिकं श्लेष्ममूल- मूर्ध्वमुत्क्षिपति, तत्रावजिते श्लेष्मण्यपि शरीरान्तर्गताः श्लेष्मविकाराः प्रशान्ति-मापद्यन्ते, विशेषेण तु कासाः श्वासाश्च प्रशांतिमापद्यन्ते। यतो हि मूलस्थान- स्थितस्योरोगतस्य श्लेष्मणोऽनुबन्धस्य परिसमाप्तिर्भवति, तेन हि ते श्वासाः कासाश्च बलहीना भवन्ति। यथा हि-**

**निर्हृते सुखमाप्नोति सकफे दुष्टविग्रहे।**
**स्रोतःसु च विशुद्धेषु चरत्यविहतोऽनिलः।।**

-(च.चि. 17/76)

रोगियों में तो रोगी और रोग की अवस्था के अनुसार वमनकर्म किसी भी समय में पञ्चकर्म के विशेषज्ञ चिकित्सक सम्पादन कर लेते हैं, क्योंकि चिकित्सक सभी उपक्रमों में वमन को प्रधानतम मानते हैं। निश्चित रूप से यह वमन शीघ्र ही आमाशय में प्रवष्टि होकर सम्पूर्ण विकार-सम्बन्धी कफ के मूल को उत्क्षिप्त कर देता है अर्थात् समूल उखाड़ देता है। इस कफ के सम्पूर्ण रूप से जीत लेने पर शरीर के अन्तर्वर्ती कफ विकार पूर्ण रूप से शान्ति को प्राप्त हो जाते हैं, विशेष रूप से तो कास और श्वास रोग शान्ति को प्राप्त कर लेते हैं, क्योंकि मूल स्थान स्थित उरोगत श्लेष्मा के अनुबन्ध की परिसमाप्ति हो जाती है, उससे श्वास और कास बलहीन हो जाते हैं, जैसा कि कहा गया है। दुष्ट स्वरूप वाले विग्रह स्वरूपक (रुके हुए, ग्रथित) कफ के निकल जाने पर वह रोगी सुख को प्राप्त करता है और स्रोतस् के विशुद्ध हो जाने पर वायु निर्बाध रूप से शरीर में विचारण करती है।

**कासपीडिते स्वरभङ्गपीडिते च बुद्धिमांश्चि-कित्सकः वातश्लेष्महरैर्द्रव्यैर्युक्तं छर्दनं दद्यात्। यथा -**

**कासिने च्छर्दनं दद्यात्स्वरभङ्गे च बुद्धिमान्।**
**वातश्लेष्महरैर्युक्तं........... ।। च.चि. 17/121।।**

**एवं प्राथमिकरूपेण वमनकर्म श्वासकासग्रस्तेषु परमोपयोग्यस्ति, पुनरपि श्वासिने तु वमनानन्तरं विरेचनमप्यपेक्षितम्। यतो हि श्वासरोगेषु विरेचन-मेवोत्कृष्टतमं मन्यन्ते पञ्चकर्मविशेषज्ञाः, विशेषेण तु तमकेश्वासे। आचार्यश्चरकोऽपि निर्दिशति यत्-**

**कफाधिकेबलस्थेन च वमनं सविरेचनम्।**
**कुर्यात्पथ्याशिने धूमलेहादिशमनं ततः।।च.चि.17/89।।**

कासरोग से पीड़ित एवं स्वरभङ्ग से पीड़ित रोगी में बुद्धिमान् चिकित्सक वात तथा श्लेष्मा का हरण करने वाले द्रव्यों से युक्त वमन दे, जैसा कि कहा गया है-

कास के रोगी के लिए एवं स्वरभङ्ग में बुद्धिमान् वात श्लेष्महर द्रव्यों से युक्त वमन दे। इस प्रकार के प्राथमिक रूप से वमनकर्म श्वास कास से पीड़ित रोगियों में परम उपयोगी होता है, फिर भी श्वास के रोगी के लिए तो वमन के बाद विरेचन को ही श्रेष्ठ कर्म मानते हैं, विशेषरूप से तो **तमक श्वास** में उसे श्रेष्ठ माना जाता है। आचार्य चरक भी निर्देश देते हैं कि जो बलवान् व्यक्ति है और कफ की अधिकता है तो उसमें विरेचन सहित वमन देना चाहिए अर्थात् वमन के बाद विरेचन देना चाहिए एवं उसके बाद पथ्य का भोजन करने वाले रोगी के लिए धूम एवं लेह इत्यादि शमन का प्रयोग करना चाहिए **तमक** श्वास में तो विरेचन श्रेष्ठ माना जाता है।

**( .......... तमके तु विरेचनम्-आचार्य चरक )**

**वमनकर्म तु सर्वेष्वेव श्वासकासग्रस्तेषु रुग्णेषु सम्पादनीयं न वर्तते। आचार्यश्चरकः सङ्केतयति यत् कासश्वासामयी ह्येको बलवान्दुर्बलोऽपरश्च भवति, एवमेवैको रूक्षो वह्निलोऽपरश्च कफाधिको भवत्यतः कफाधिके बलस्थे च स विरेचनं वमनं कुर्यादपरे रूक्षे बह्वनिले तु रुग्णे धूमलेहादिशमनं तथा श्वास कासघ्नानां विशिष्टानामौषधयोगानां सेवनं सुखदम्भवति। रोगिणः रोगस्य च बलमवेक्ष्य तं कटुकतिक्तकषायतीक्ष्णोष्ण-रूक्षैरुपक्रमैरुपक्रमेत, विशेषस्तु स्वेदनशिरोविरेचन-व्यायामादिभिः श्लेष्महरै रुपक्रमैर्मात्रां कालं च प्रमाणीकृत्य। षड्बिन्दुतैलेनाणुतैलेन वा विधिना सम्पादितं नस्यकर्म परमोपयोगि वर्तते। ये च विधिविहितस्य नस्यकर्मणः सम्पादनेऽक्षमा अयोग्या अनवधानाः वा सन्ति तैस्तु नियमितरूपेण प्रातः सायं प्रत्येकस्यां नासायां बिन्दुत्रयात्मकं षड्बिन्दुतैलमणुतैलं सर्षपतैलं वा निक्षेपणीयमथवा नस्तः स्नेहाङ्गुलिं देयं प्रातर्निशि च सर्वदा।**

वमन कर्म तो सभी श्वास एवं कास रोग से ग्रस्त रोगियों में सम्पन्न करने योग्य नहीं होता है। आचार्य चरक सङ्केत करते हैं कि कास एवं श्वास से पीड़ित एक रोगी बलवान् और दूसरा दुर्बल होता है, इसी प्रकार से एक रूक्ष और अधिक वातदोष से युक्त होता है जबकि दूसरा कफ की अधिकता वाला होता है, इसलिए कफ की अधिकता वाले एवं जिसमें बल है ऐसे रोगी में विरेचन सहित वमनकर्म करना चाहिए, दूसरे रूक्ष एवं अधिक वातदोष से युक्त रोगी में तो धूम एवं अवलेह इत्यादि का सेवन तथा श्वास एवं कास को नष्ट करने वाली विशिष्ट औषधियों का सेवन सुखदाई हाता है। रोगी के एवं रोग के बल को देखकर उसकी कटु, तिक्त, कषाय, तीक्ष्ण, ऊष्ण, रूक्ष उपक्रमों से चिकित्सा करनी चाहिए। विशेष रूप से तो स्वेदन, शिरोविरेचन एवं व्यायाम इत्यादिश्लेष्मा का हरण करने वाले उपक्रमों से मात्रा और काल को ध्यान में रखकर चिकित्सा करनी चाहिए। षड्-बिन्दु तैल से अथवा अणुतैल से या सर्षपतैल से विधिपूर्वक सम्पन्न किया गया नस्य कर्म अत्यन्त उपयोगी होता है। जो लोग विधियुक्त नस्य कर्म को सम्पन्न करने में सक्षम नहीं है, अयोग्य हैं और असावधान हैं उनके द्वारा तो नियमित रूप से प्रातः काल और सायं काल प्रत्येक नाक में तीन तीन बिंदु वाला अर्थात् प्रत्येक नाक में तीन तीन बिंदु षड्-बिंदुतैल, अणुतैल अथवा सरसों का तेल डालना चाहिए अथवा अंगुली को तैल में डुबोकर उसे सर्वदा प्रातः काल एवं रात्रि में नाक में देना चाहिए।

**एवमेव वसन्तेऽभ्यङ्गस्वेदनावुपक्रमणीयौ वर्तेते ताभ्यां हि कासश्वासाः शीघ्रं मन्दतां यान्ति। आयुर्वेदे पञ्चविधाः कासाः पञ्चविधा एव च श्वासाः निर्दिष्टाः सन्ति, तेषु सर्वेष्वेवैत उपक्रमाः शीघ्रमेव सुखदाः भवन्ति। एतेष्वप्युपक्रमेषु वमनकर्म प्रमुखरूपेण सम्पादनीयमस्ति यस्य ह्युल्लेखः प्राथमिकरूपेणोपरि विहितः**

इस प्रकार से वसन्त ऋतु में अभ्यङ्ग एवं स्वेदन ये दोनों उपक्रम करने योग्य होते हैं, इन दोनों से ही कास और श्वास रोग शीघ्र ही मंदता को प्राप्त होते हैं। आयुर्वेद में पांच प्रकार के कास और पांच प्रकार के ही श्वास कहे गये हैं, उनमें सभी में ये उपक्रम शीघ्र ही सुख प्रदान करने वाले होते हैं, इन उपक्रमों में वमनकर्म प्रमुखरूप से सम्पन्न करने योग्य होता है, जिसका उल्लेख प्राथमिक रूप से ऊपर कर दिया गया है।

**उभयात्मकेष्वेतेषु रुग्णेषु दोषप्रशमकानां स्नेहयूष-रसादीनामाहारे प्रयोगः विशेषेण करणीयः, बह्वनिले तु रुग्णे शमनैः स्नेहयूषरसादिभिस्तर्पणं समुचितम्। एतत्तु पृथक् रूपेणान्यस्मिन् स्वतन्त्रे लेखे विवेचनीयमस्ति। श्वास-कासानां दुष्प्रभावस्तु प्रमुखरूपेणोरःप्रदेशे भवति तत्रापि च विशेषेण श्वासप्रणालिषु श्लेष्मणः संसक्तता भवति कदाचिच्च प्रवृद्धस्यास्योद्वेलनमप्यधिकम्भवति तेन हि प्रतिक्रिया भवत्युरःस्थासु श्लेष्मलकलासु, तया चाकुञ्चनप्रसारणयोर्गतिरभिवर्धते कासश्वासरूपेण। क्रमेऽस्मिन्नभिवृद्धः प्रसृतश्च श्लेष्मा प्रसरणशीलस्य प्राणवायोर्गत्यवरोधः करोत्यत एव पुनः पुनः मार्ग-विशोधनङ्करणीयम्। कथयति चाचार्यः हिक्काश्वासप्रसङ्गे, यथा-**

**उदीर्यते भृशतरं मार्गरोधाद्वहज्जलम्।<br>यथा तथाऽनिलस्तस्य मार्गं नित्यं विशोधयेत्।।<br>(च.चि. 17.122)**

दोनों तरह के इन रोगियों में दोष का प्रशमन करने वाले स्नेह, यूष, मांस रस इत्यादि का आहार में प्रयोग विशेष रूप से करना चाहिए। अधिक प्रवृद्ध वातदोष वाले रोगी में तो शमन करने वाले स्नेह, यूष एवं मांस रस इत्यादि से तर्पण करना उपयुक्त रहता है। यह तो पृथक् रूप से अन्य किसी स्वतन्त्र लेख में विवेचन करने योग्य है। श्वास एवं कासरोगों का दुष्प्रभाव तो प्रमुख रूप से उरः प्रदेश में होता है, वहाँ पर भी विशेष रूप से श्वास प्रणालियों में श्लेष्मा की संसक्तता (चिपकना) होता है और कभी बढे हुए कफ का उद्वेलन (बाहर की ओर निकलना) भी अधिक होता है, उस के कारण ही उरःप्रदेश में स्थित श्लेष्मल कलाओं में प्रतिक्रिया होती है, उस प्रतिक्रिया से आकुञ्चन और प्रसारण की गति कास-श्वास के रूप में बढ़ जाती है। इस क्रम में अभिवृद्ध और फैला हुआ श्लेष्मा प्रसरणशील प्राणवायु की गति में

अवरोध करता है, इसलिए बार-बार शोधन करना चाहिए, आचार्य चरक हिक्का एवं श्वास के प्रसङ्ग में कहते हैं। यथा-

जिस प्रकार बहता हुआ जल मार्ग के अवरोध के कारण अत्यधिक ऊपर की तरफ बढ़ जाता है, उसी प्रकार से मार्गावरोध के कारण अवरुद्ध हुआ वायु प्रकुपित हो जाता है, इसलिए उसके (वायु के) मार्ग को प्रतिदिन शुद्ध करना चाहिए।

**अत एव हिक्काश्वासकासादिषु श्वासमार्ग-विशोधनार्थं पुनः पुनरौषधमुपयोजयेत्। विशेषेण तु कफनाशकावलेहानामौषधात्मकानां च धूमानां द्रवात्मकानां कषायाणामौषधसिद्धानां क्षीराणा-मौषधात्मकानाञ्च यूषाणां प्रयोगः सुखावहः। प्रयोगस्त्वेषां स्वल्पमात्रायामेव पुनः पुनः करणीय-स्तत्रापि च भिषक् परामर्शस्तूपयोगी भवत्येव। अत्र तु केषाञ्चिच्छ्वासकासापहारकाणां निरापदस्वरूपात्म-कानां योगानामुल्लेखो विधीयते-**

इसलिए हिक्का, श्वास एवं कास इत्यादि रोगों में श्वास-प्रणालियों के विशोधन के लिए पुनः पुनः औषध का प्रयोग करना चाहिए, विशेष रूप से तो कफ का नाश करने वाले अवलेहों तथा औषधस्वरूपक धूमों (जैसा कि वर्तमान में Inhaler का प्रयोग किया जाता है) का एवं द्रवात्मक कषायों का, औषधसिद्धक्षीर (दूध) तथा औषध से सिद्ध किए हुए यूष का प्रयोग सुखकारक होता है। इन का प्रयोग अल्प मात्रा में ही बार बार करना चाहिए और इसमें भी चिकित्सक का परामर्श तो उपयोगी होता ही है। यहाँ पर श्वास एवं कास को दूर करने वाले किसी भी प्रकार की बाधा या उपद्रव नहीं करने वाले कुछ योगों का उल्लेख किया जा रहा है-

**1. सुप्रसिद्धस्य च्ववनप्राशस्य लेहनङ्कुर्यात् मात्रया।**

सुप्रसिद्ध च्यवनप्राश का मात्रापूर्वक लेहन (चाटना) करना चाहिए।

**2. सितोपलादिचूर्णं लेहयेत् क्षौद्रसर्पिषा, तालीसादि-चूर्णं वा क्षौद्रेण।**

सितोपलादिचूर्ण को शहद एवं घी मिलाकर चाटना चाहिए अथवा शहद से तालीसादि चूर्ण को चाटना चाहिए।

**3. व्योषादिगुटिकाया एलादिगुटिकायाः मरिच्या-दिवट्या वाऽऽचूषणङ्कुर्यात् पुनः पुनरेकस्मिन् दिवसे पञ्चवारपर्यन्तमेव।**

व्योषादिगुटिका, एलादिगुटिका अथवा मरिच्यादि वटी का आचूषण बार-बार करना चाहिए, लेकिन यह दिन में 5 बार ही करना पर्याप्त होता है।

**4. युक्त्या विनिर्मितानां सर्पिर्गुडानां विधिविहितः प्रयोगः करणीयः भिषङ्निर्देशेन।**

युक्तिपूर्वक बनाए गए सर्पिगुड नामक औषध-योगों का विधि विहित प्रयोग चिकित्सक के निर्देश से करना चाहिए।

**5. चिकित्सकनिर्देशने विहितः पिप्पलीवर्धमान-प्रयोगोऽपि श्लेष्मापहारकोऽग्निविवर्द्धकश्च भवति।**

चिकित्सक के निर्देश से किया गया पिप्पली वर्धमान का प्रयोग भी श्लेष्मा को दूर करने वाला और अग्नि को बढ़ाने वाला होता है।

**6. शटी-चोरक-जीवन्तीत्वङ्-मुस्तान् पुष्कराह्वयं, सुरसं-तामलकीमेलां पिप्पलीमगुरुं नागरं वालकं च-सममात्रायां गृहीत्वा चूर्णञ्चाष्टगुणशर्करं कृत्वा प्रातः सायमुष्णोदकेन पिबेल्लेहयेद्वा क्षौद्रेण, मात्रा तु पूर्णवयस्कस्य कृते त्रिग्रामात्मिकैव पर्याप्ता। महर्षिणा चरकेण निर्दिष्टमिदञ्चूर्णं तमकेश्वासे हिक्कायां च प्रयोजयेत्कासेष्वपि सुखदमिदञ्चूर्णम्।**

कर्चूर, चोरक (ग्रन्थिपर्ण, गठिवन), जीवन्ती, दालचीनी नागरमोथा, पुष्करमूल, सुरस (तुलसी) भूमि-आँवला, इलायची, पिप्पली, अगुरु, सोंठ, सुगन्ध बाला इन सब को समान मात्रा में लेकर और द्रव्य से आठ गुणा शर्करा लेकर चूर्ण बनाकर इसे प्रातः काल एवं सायङ्काल उष्णोदक से पीना चाहिए अथवा शहद से चाटना चाहिए। इसकी मात्रा तो पूर्ण वयस्क के लिए 3 ग्राम ही पर्याप्त है। महर्षि चरक के द्वारा निर्दिष्ट यह चूर्ण तमक श्वास में और हिक्का में प्रयुक्त करना चाहिए। कास के भेदों में भी यह चूर्ण सुख प्रदान करने वाला होता है।

**80, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2021-23

## संस्कृत समाचाराः



व्यास-बालाबक्षशोधसंस्थानेन 22.03.2021 दिनांके 'सरस्वती' सम्मानेन पुरस्कृतो 'भारती' संस्कृत-पत्रिकायाः कार्यालय-व्यवस्थापकः श्रीराजीवदाधीचः



संस्कृतविदुषो डाक्टर-गंगाधरभट्टस्मृतौ तद्धर्मत्न्या डॉ. राजेश्वरीभट्टमहोदयया नवनिर्मितं श्रीतुर्भुजनाथशिवमंदिरं 28.02.2021 दिनाङ्के लोकाय समर्पयन्तः, दीपं प्रज्वाल्य कार्यक्रमस्य शुभारंभं च कुर्वन्तः भारतीसंरक्षकाः स्वामिनः संवित्- सोमगिरिमहाराजाः पार्श्वे उपस्थिता नारीस्तम्भ-लेखिका डॉ. राजेश्वरीभट्टमहोदया।

### आचार्य उमेशशास्त्री स्मृतिग्रन्थविमोचनसमारोहः सम्पन्नः

सुविख्यात जयपुरीयविदुष आचार्य उमेशशास्त्रिणः स्मृतौ डॉ. देवकोठारी सम्पादितस्य स्मृतिग्रन्थस्य विमोचन समारोहः मार्च मासस्य 22 तमे दिनाङ्के भट्टारकनसियास्थिते इन्द्रलोकसभागारे समायोजितः। डॉ. अर्कनाथ चौधरी महोदयाः कार्यक्रमस्य अध्यक्षाः आसन्। मुख्यातिथयः राजस्थानसर्वकारस्य संस्कृतशिक्षाविभागस्य शिक्षाराज्य मंत्री सुभाषगर्गमहोदया आसन्। कार्यक्रमस्य प्रारम्भो महामण्डलेश्वर ज्ञानेश्वरपुरी महोदयानामाशीर्वचनेन संजातः। कार्यक्रमे प्रो. भास्करशर्मश्रोत्रियः आचार्य सीतारामपारीकः प्रो. राजेन्द्रमिश्रश्च मुख्यवक्तार आसन्। कार्यक्रमस्य संचालनं डॉ. महेशशर्मा (शास्त्रीकोसलेद्रदास) द्वारा विहितम्। आचार्य उमेशशास्त्री आजीवन उपलब्धि पुरस्कारः पं. अनन्तशर्मभ्यः, राजेन्द्र स्मृतिपुरस्कारः, डॉ. नरेशदाधीच महोदयेभ्यः, गोवर्धनलालव्यासपत्रकारितापुरस्कारः वेदप्रकाशशर्म-मंजूशर्मभ्यां प्रदत्तः। सरस्वतीपुरस्कारः डॉ. अरविन्दकुमार-सोमबाबूशर्मा-मृत्युञ्जयगुप्ता, कृष्णकुमारशर्मा, राजीवदाधीच, पंडितमहेशशर्मा-इत्येतेभ्यो विद्वद्भ्यः प्रदत्तः। न्यासबालाबक्षशोध संस्थानस्य श्रीमतीशुकन्तलाशर्मा धन्यवादं ज्ञापितवती। - सम्पादकः





राजगंगा चेरिटेबल ट्रस्ट द्वारा जयपुरस्थराजकीय-महाराज-संस्कृत-विद्यालये संगणकयन्त्रम् ( Computer ) जयपुरमण्डले तितरियाग्रामस्थ-राजकीय-संस्कृतविद्यालये शीतलजलप्रपा ( Water Cooler ) चोपायनीकृते।

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् अध्यक्षः शंकरप्रसादशुक्लः प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–15, न्यू कॉलोनी, जयपुरम्–३०२००१ • दूरभाषः ०१४१–२३७९०१४

प्रतिष्ठायाम्,